"Even among time and all directions, everywhere, Achyuta, I know no other. During leaving the body, there is this great fear."

त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥ ३० ॥

tvatpaadakamalaadanyanna me janmaantareshvapi |
nimittam kushalasyaasti yena gachchhaami sadgatim || 30 ||

"Other than Your lotus feet, even in all other births, there is no other for me, which are the cause for prosperity through which I can go to the Sat-gati."

विज्ञानं यदिदं प्राप्तं यदिदं स्थानमार्जितम् ।
जन्मान्तरेऽपि मे देव मा भूदस्य परिक्षयः ॥ ३१ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

vijnaanam yadidam praaptam yadidam sthaanamarjitam |
janmaantare'pi me deva maa bhoodasya parikshayaha || 31 ||

“That spiritual knowledge and position which have been acquired – may they not decay, Deva, even in all other births of mine.”

दुर्गतायां वाऽपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं नविन्देत तावदस्मिन् कृतीसदा ॥ ३२ ॥

durgataayaam vaa'pi jaataayaam tvadgato me manorathaha |
yadi naasham navindeta taavadasmin krteesadaa || 32 ||

“Even if being born in the worst condition, if my attachment to You does not cease – that is when I am in the highest end of existence.”

न कामकलुषं चित्तं मम ते पादयाः स्थितम् ।
कामये वैष्णवत्वं तु सर्वजन्मसु केवलम् ॥ ३३ ॥

na kaamakalusham chittam mama te paadayaaha sthitam |
kaamaye vaishnavatvam tu sarvajanmasu kevalam || 33 ||

“Without (unwanted) desires, may my mind should remain focused on Your feet and I desire Vaishnavatva alone, certainly in all janmas.”

© Copyrights 2022-26 Achyuta Bhakti Deets

**To offer all actions and their results to Shri Vishnu and pray for His mercy**:

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष जनार्दन ॥

anyathaa sharanam naasti tvameva sharanam mama |
tasmaat kaarunya bhaavena raksha raksha janaardana ||

"I have no other refuge and You alone are my refuge. Due to this, out of compassion, protect and protect me, Janaardana."

संसारं दुष्करं घोरं दुर्निरीक्षं दुरासदम् ।
भीतोऽहं दारुणं दृष्ट्वा त्राहि मां भव सागरात् ॥

samsaaram dushkaram ghoram durnireeksham duraasadam |
bheeto'ham daarunam drshtvaa traahi maam bhava saagaraat ||

"This terrible samsaara is difficult to bear, tolerate and overcome. I am frigtened. Seeing this, save me from this ocean."

ज्ञानतोऽज्ञानतो वापि विहितं यन्मया शुभं ।
तत्सर्वं पूर्णमेवास्तु प्रीतो भव जनार्दन ॥

jnaanato'jnaanato vaapi vihitam yanmayaa shubham |
tatsarvam poornamevaastu preeto bhava janaardana ||

"Whatever virtues I have done, intentionally or unintentionally – may all of them become complete and please You, Janaardana."

(It is recommended to recite the following shloka regularly at the end of the day and as well as while concluding other saadhanas/prayers)

कायेन वाचा मनसेन्द्रियर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

kaayena vaachaa manasendriyarvaa buddhyaatmanaa vaanusrtasvabhaavaat |
karomi yadyat sakalam parasmai naaraayanaayeti samarpayaami ||

"Whatever is done through the body, speech, mind, senses, intellect, Aatma, under the influence of my nature, I offer it, in its entirety, to Naaraayana."
—Addendum of the Vishnu Sahasranaama (also in the Bhaagavata Puraana, Skandha 11, Adhyaaya 2, Shloka 36; Quoted by Shri Madhvacharya in Sadaachaara Smrti, Shloka 16)

© Copyrights 2022-26 Achyuta Bhakti Deets

# 2. Vaidika Suktas and Mantras

The contents of this section are Veda mantras and therefore, are specifically supposed to be chanted by Dvijas only. Others are advised to skip it.

## Naaraayana Upanishad

(Krshna-Yajurveda)

### नारायणोपनिषत्

ॐ स॒ह ना॑ववतु ।
स॒ह नौ॑ भुनक्तु ।
स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृ॑जेये॒ति । ना॒रा॒य॒णात्प्रा॑णो जा॒यते । मनः सर्वेन्द्रि॑याणि॒ च । खं वायुर्ज्योतिरापः पृथिवी विश्व॑स्य धा॒रिणी । ना॒रा॒य॒णाद्ब्र॑ह्मा जा॒यते । ना॒रा॒य॒णाद्रु॑द्रो जा॒यते । ना॒रा॒य॒णादिन्द्रो जा॒यते । ना॒रा॒य॒णात्प्रजापतयः प्र॑जाय॒न्ते । ना॒रा॒य॒णाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि च छन्दा॒ग्ं॒सि । ना॒रा॒य॒णादेव समु॑त्पद्य॒न्ते । ना॒रा॒य॒णे प्र॑वर्त॒न्ते । ना॒रा॒य॒णे प्र॑लीय॒न्ते ॥

ॐ । अथ नित्यो ना॑राय॒णः । ब्रह्मा ना॑राय॒णः । शि॒वश्च॑ नाराय॒णः । श॒क्रश्च॑ नाराय॒णः । द्या॒वा॒पृ॒थि॒व्यौ च॑ नाराय॒णः । का॒लश्च॑ नाराय॒णः । दि॒शश्च॑ नाराय॒णः । ऊ॒र्ध्वश्च॑ नाराय॒णः । अ॒धश्च॑ नाराय॒णः । अ॒न्त॒र्ब॒हिश्च॑ नाराय॒णः । नारायण ए॒वेदग्ं स॒र्वम् । यद्भू॒तं यच्च॒ भव्य᳚म् । निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको॑ नाराय॒णः । न द्वितीयो᳚ऽस्ति॒ कश्चि॑त् । य ए॒वं वे॒द । स विष्णुरेव भवति स विष्णुरे॒व भ॒वति ॥

ओमित्य॑ग्रे व्या॒हरेत् । नम इ॑ति प॒श्चात् । ना॒रा॒य॒णायेत्यु॑परि॒ष्टात् । ओमि॑त्येका॒क्षरम् । नम इति॑ द्वे अ॒क्षरे । ना॒रा॒य॒णायेति पञ्चा᳚क्षरा॒णि । एतद्वै नारायणस्याष्टाक्ष॑रं प॒दम् । यो ह वै नारायणस्याष्टाक्षरं पद॑मध्ये॒ति । अनपब्रवस्सर्वमा॑युरे॒ति । विन्दते प्रा॑जाप॒त्यग्ं रायस्पोषं॑ गौप॒त्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नु॑त इ॒ति । य ए॒वं वे॒द ॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणव॑स्वरू॒पम् । अकार उकार मका॑र इ॒ति । तानेकधा समभरत्तदे॒तदो॑मि॒ति । यमुक्त्वा॑ मुच्य॑ते यो॒गी॒ ज॒न्म॒संसा॑रब॒न्धनात् । ॐ नमो नारायणायेति म॑न्त्रोपा॒सकः । वैकुण्ठभुवनलोकं॑ गमि॒ष्यति । तदिदं परं पुण्डरीकं वि॑ज्ञान॒घनम् । तस्मात्तदिदा॑वन्मा॒त्रम् । ब्रह्मण्यो देव॑कीपु॒त्रो ब्रह्मण्यो म॑धुसू॒दनोम् । सर्वभूतस्थमेकं॑ नारा॒यणम् । कारणपुरुषमकारणं प॑रब्र॒ह्मोम् । एतदथर्व शिरो॑योऽधी॒ते ॥

प्रा॒तर॑धीया॒नो॒ रात्रिकृतं पापं॑ नाश॒यति । सा॒यम॑धीया॒नो॒ दिवसकृतं पापं॑ नाश॒यति । माध्यन्दिनमादित्याभिमुखो॑ऽधीया॒नः॒ पञ्चपातकोपपातका᳚त्प्रमु॒च्यते । सर्व वेद पारायण पु॑ण्यं ल॒भते । नारायणसायुज्यम॑वाप्नो॒ति॒ नारायण सायुज्यम॑वाप्नो॒ति । य ए॒वं वे॒द । इत्यु॑प॒निष॑त् ॥

ॐ स॒ह ना॑ववतु ।
स॒ह नौ॑ भुनक्तु ।

© Copyrights 2022-26 Achyuta Bhakti Deets

स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑ ॥
ॐ शान्ति॒: शान्ति॒: शान्ति॑: ॥

इति श्री नारायणोपनिषत् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## Naaraayana Sukta

(Krshna-Yajurveda, Taittireeya Aaranyaka, Prapaathaka 10, Anuvaaka 13; Andhra Paatha)

### नारायणसूक्तम्

स॒ह॒स्र॒शीर्षं॑ दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वश॑म्भुवम् ।
विश्वं॑ ना॒राय॑णं दे॒व॒म॒क्षरं॑ पर॒मं प॒दम् ॥ १ ॥

वि॒श्वतः॒ पर॑मान्नि॒त्यं॒ वि॒श्वं ना॑राय॒णꣳ ह॑रिम् ।
विश्व॑मे॒वेदं पुरु॑षस्तद्विश्व॒मुप॑जीवति ॥ २ ॥

पतिं॒ विश्व॑स्या॒त्मेश्व॑रꣳ शाश्व॑तꣳ शि॒वम॑च्युतम् ।
ना॒राय॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒रायणम् ॥ ३ ॥

नारा॑य॒ण प॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः ।
नारा॑य॒ण प॑रं ब्र॒ह्म॒ त॒त्त्वं ना॑राय॒णः प॑रः ॥ ४ ॥

ना॒राय॒ण प॑रो ध्या॒ता॒ ध्या॒नं ना॑राय॒णः प॑रः ।
यच्च॑ कि॒ञ्चिज्ज॑गत्सर्वं॒ दृ॒श्यते॑ श्रूय॒तेऽपि॑ वा ॥ ५ ॥

अन्त॑र्ब॒हिश्च॑ तत्स॒र्वं॒ व्या॒प्य ना॑राय॒णः स्थि॑तः ।
अन॑न्त॒मव्य॑यं क॒विꣳ स॑मु॒द्रेऽन्तं॑ वि॒श्वश॑म्भुवम् ॥ ६ ॥

प॒द्म॒को॒शप्र॑तीका॒श॒ꣳ हृ॒दयं॑ चाप्य॒धोमु॑खम् ।
अधो॑ नि॒ष्ट्या वि॑तस्त्या॒न्ते॒ ना॒भ्यामु॑परि॒ तिष्ठ॑ति ॥ ७ ॥

ज्वा॒ला॒मा॒लाकु॑लं भा॒ती॒ वि॒श्वस्या॑यत॒नं म॑हत् ।
सन्त॑तꣳ शि॒लाभि॑स्तु॒ लम्ब॑त्याकोश॒सन्नि॑भम् ॥ ८ ॥

तस्यान्ते॑ सुषि॒रꣳ सू॒क्ष्मं तस्मि॑न्त्स॒र्वं प्रति॑ष्ठितम् ।
तस्य॒ मध्ये॑ म॒हान॑ग्निर्वि॒श्वार्चि॑र्वि॒श्वतो॑मुखः ॥ ९ ॥

सोऽग्र॑भु॒ग्विभ॑जन्ति॒ष्ठ॒न्नाहा॑रमज॒रः क॒विः ।
ति॒र्य॒गू॒र्ध्वम॑धश्शा॒यी र॒श्मय॑स्तस्य॒ सन्तताः ॥ १० ॥

स॒न्ता॒पय॑ति स्वं दे॒हमापा॑दतल॒मस्त॑कः ।
तस्य॒ मध्ये॒ वह्नि॑शिखा अ॒णीयो॑र्ध्वा व्य॒वस्थि॑तः ॥ ११ ॥

नी॒लतो॑यद॑मध्य॒स्था॒द्वि॒द्यु॒ल्ले॑खेव॒ भास्व॑रा ।
नी॒वा॒र॒शूक॑वत्त॒न्वी॒ पी॒ता भा॑ँस्वत्य॒णूपमा ॥ १२ ॥

तस्याः॑ शिखा॒या म॑ध्ये प॒रमा॑त्मा व्य॒वस्थि॑तः ।
स ब्रह्म॒ स शिव॒स्स हरि॒स्सेन्द्र॒स्सोऽक्ष॑रः पर॒मः स्व॒राट् ॥ १३ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

ऋ॒तꣳ स॒त्यं प॑रं ब्र॒ह्म पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम् ।
ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षँ॒ वि॒श्वरू॑पाय॒ वै नमो॒ नमः॑ ॥

ॐ ना॒रा॒य॒णाय॑ वि॒द्महे॑ वा॒सु॒दे॒वाय॑ धीमहि ।
तन्नो॑ विष्णुः प्रचो॒दया॑त् ॥ (Vishnu Gaayatri; Maha-Naaraayana Upanishad; Anuvaaka 1, Mantra 29)

ॐ शा॒न्ति श्शा॒न्ति श्शा॒न्तिः॑ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## Purusha Sukta

### पुरुषसूक्तम्

**॥ अथ ऋग्वेदीय पुरुषसूक्तः ॥**

(The Purusha Sukta of the Rgveda; Mandala 10, Sukta 90)

अथ पुरुषसूक्तम् ॥

ॐ स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम् ॥ १ ॥

पुरु॑ष ए॒वेदं सर्वं॒ यद्भू॒तं यच्च॒ भव्य॑म् ।
उ॒तामृ॑त॒त्वस्येशा॑नो॒ यदन्ने॑नाति॒रोह॑ति ॥ २ ॥

ए॒तावा॑नस्य महि॒मातो॒ ज्यायाँ॑श्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥ ३ ॥

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः॒ पादो॑ऽस्ये॒हाभ॑व॒त्पुनः॑ ।
ततो॒ विष्व॒ङ्व्य॑क्रामत्साशनानश॒ने अ॒भि ॥ ४ ॥

तस्मा॑द्वि॒राळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।
व॒स॒न्तो अ॑स्यासी॒दाज्यं॑ ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः ॥ ६ ॥

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न्पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये ॥ ७ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ः सम्भृ॑तं पृषदा॒ज्यम् ।
प॒शून्ताँश्च॑क्रे वाय॒व्या॑नार॒ण्यान्ग्रा॒म्याश्च॒ ये ॥ ८ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ ऋच॒ः सामा॑नि जज्ञिरे ।
छन्दां॑सि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥ ९ ॥

तस्मा॒दश्वा॑ अजायन्त॒ ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः ॥ १० ॥

यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्पयन् ।
मुखं॒ किम॑स्य॒ कौ बा॒हू का ऊ॒रू पादा॑ उच्येते ॥ ११ ॥

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्य॑ः कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः प॒द्भ्यां शू॒द्रो अ॑जायत ॥ १२ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒: सूर्यो॑ अजायत ।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ प्रा॒णाद्वा॒युर॑जायत ॥ १३ ॥

नाभ्या॑ आसीद॒न्तरि॑क्षं शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिश॒: श्रोत्रा॒त्तथा॑ लो॒काँ अ॑कल्पयन् ॥ १४ ॥

स॒प्तास्या॑सन्परि॒धय॒स्त्रिः स॒प्त स॒मिध॑: कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न्पुरु॑षं प॒शुम् ॥ १५ ॥

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाकं॑ महि॒मान॑: सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥ १६ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## ॥ अथ कृष्णयजुर्वेदीय पुरुषसूक्तः ॥

(The Purusha Sukta of the Krshna-Yajurveda; Taittireeya Aaranyaka, Prapaathaka 3, Anuvaaka 12)

हरिः ॐ ॥
स॒हस्र॑शीर्षा॒ पुरु॑षः स॒ह॒स्रा॒क्षस्स॒हस्र॑पात् ।
स भूमिँ॑ वि॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठद्दशाङ्गु॒लम् ॥ १ ॥

पुरु॑ष ए॒वेद॒ꣳ सर्वम्॑ । यद्भू॒तँ यच्च॒ भव्य॑म् ।
उ॒तामृ॑त॒त्वस्येशा॑नः । यदन्ने॑नाति॒रोह॑ति ॥ २ ॥

ए॒तावा॑नस्य महि॒मा । अतो॒ ज्याया॒ꣳश्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ । त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥ ३ ॥

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः । पादो॑ऽस्ये॒हाभ॑वा॒त्पुनः॑ ।
ततो॒ विष्व॒ङ् व्य॑क्रामत् । सा॒श॒ना॒न॒श॒ने अ॒भि ॥ ४ ॥

तस्मा॑द्वि॒राड॑जायत । वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत । प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

यत्पुरु॑षेण ह॒विषा॑ । दे॒वा य॒ज्ञमत॑न्वत ।
व॒स॒न्तो अ॑स्यासी॒दाज्य॑म् । ग्री॒ष्म इ॒ध्मश्श॒रद्ध॒विः ॥ ६ ॥

स॒प्तास्या॑सन्परि॒धयः॑ । त्रिस्स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्न॒न्पुरु॑षं प॒शुम् ॥ ७ ॥

तँ य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॑न् । पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अय॑जन्त । सा॒ध्या ऋष॑यश्च॒ ये ॥ ८ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॑ । संभृ॑तं पृषदा॒ज्यम् ।
प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान्ग्रा॒म्याश्च॒ ये ॥ ९ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॑ । ऋचः॒ सामा॑नि जज्ञिरे ।
छन्दा॒ꣳसि जज्ञिरे॒ तस्मा॑त् । यजु॒स्तस्मा॑दजायत ॥ १० ॥

तस्मा॒दश्वा॑ अजायन्त । ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॑त् । तस्मा॑ज्जा॒ता अ॑जा॒वयः॑ ॥ ११ ॥

यत्पुरु॑षँ॒ व्य॑दधुः । क॒ति॒धा व्य॑कल्पयन् ।
मुख॒ङ्किम॑स्य॒ कौ बा॒हू । कावू॒रू पादा॑वुच्येते ॥ १२ ॥

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्यः॑ कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ । प॒द्भ्याꣳ शू॒द्रो अ॑जायत ॥ १३ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षो॒ः सूर्यो॑ अजायत ।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत ॥ १४ ॥

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॑त् । तथा॑ लो॒काँ अ॑कल्पयन् ॥ १५ ॥

वेद॒हमे॒तं पुरु॑षं म॒हान्त॑म् । आ॒दि॒त्यव॑र्ण॒न्तम॑स॒स्तु पा॒रे ।
सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीर॑ः । नामा॑नि कृ॒त्वाऽभि॒वद॒न्यदास्ते॑ ॥ १६ ॥

धा॒ता पु॒रस्ता॒द्यमु॑दाज॒हार॑ । श॒क्रः प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः ।
तमे॒वँ वि॒द्वान॒मृत॑ इ॒ह भ॒वति । नान्यः पन्था॒ अय॑नाय विद्यते ॥ १७ ॥

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः । तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाक॑ं महि॒मान॑स्सचन्त॒े । यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः ॥ १८ ॥

**॥ उत्तरनारायणानुवाकः ॥** (Uttara-Naaraayana Anuvaaka; Taittireeya Aaranyaka, Prapaathaka 3, Anuvaaka 13)

अ॒द्भ्यस्संभू॑तः पृथि॒व्यै रसा॑च्च । वि॒श्वक॑र्मण॒स्सम॑वर्त्त॒ताधि॑ ।
तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति॒ । तत्पुरु॑षस्य॒ विश्व॒माजा॑ न॒मग्रे॑ ॥ १ ॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑म् । आ॒दि॒त्यव॑र्ण॒न्तम॑स॒ः पर॑स्तात् ।
तमे॒वँ वि॒द्वान॒मृत॑ इ॒ह भ॑वति । नान्यः पन्था॑ विद्य॒तेऽय॑नाय ॥ २ ॥

प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः । अ॒जाय॑मानो बहु॒धा विजा॑यते ।
तस्य॒ धीरा॒ः परि॑जानन्ति॒ योनि॑म् । मरी॑चीनां प॒दमि॑च्छन्ति वे॒धस॑ः ॥ ३ ॥

यो दे॒वेभ्य॒ आत॑पति । यो दे॒वाना॑ं पु॒रोहि॑तः ।
पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः । नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥ ४ ॥

रुच॑ं ब्रा॒ह्मञ्ज॒नय॑न्तः । दे॒वा अग्रे॒ तद॑ब्रुवन् ।
यस्त्वै॒वं ब्रा॑ह्म॒णो वि॒द्यात् । तस्य॑ दे॒वा अस॒न्वशे॑ ॥ ५ ॥

ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ॑ । अ॒हो॒रा॒त्रे पा॒र्श्वे । नक्ष॑त्राणि रू॒पम् । अ॒श्विनौ॒ व्यात्त॑म् ।
इ॒ष्टं म॑निषाण । अ॒मुं म॑निषाण । सर्व॑ं मनिषाण ॥ ६ ॥

इति उत्तरनारायणानुवाकः ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**॥ अथ शुक्लयजुर्वेदीय पुरुषसूक्तः॥**

(The Purusha Sukta of the Yajurveda; Vajasaneyi Samhita, Adhyaaya 31)

हरिः ॐ ॥
स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ।
स भूमि॑ꣳ स॒र्वत॑ स्पृ॒त्वाऽत्य॑तिष्ठद्दशाङ्गु॒लम् ॥ १ ॥

पुरु॑ष ए॒वेद॑ꣳ सर्वं॒ यद्भू॒तं यच्च॑ भा॒व्यम् ।
उ॒तामृ॑त॒त्वस्येशा॑नो॒ यदन्ने॑नाति॒रोह॑ति ॥ २ ॥

ए॒तावा॑नस्य महि॒मातो॒ ज्यायाँ॑श्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भूतानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥ ३ ॥

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः॒ पादो॑ऽस्ये॒हाभ॑व॒त्पुनः॑ ।
ततो॒ विष्व॒ङ् व्य॒क्रामत्साशनानश॒ने अ॒भि ॥ ४ ॥

ततो॑ वि॒राड॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॒ सम्भृ॑तं पृषदा॒ज्यम् ।
प॒शूँस्ताँश्च॑क्रे वाय॒व्या॒नार॒ण्या ग्रा॒म्याश्च॒ ये ॥ ६ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॒ ऋचः॒ सामा॑नि जज्ञिरे ।
छन्दा॑ꣳसि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥ ७ ॥

तस्मा॒दश्वा॑ अजायन्त॒ ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वयः॑ ॥ ८ ॥

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न् पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये ॥ ९ ॥

यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्पयन् ।
मुखं॒ किम॑स्यासीत्किं बा॒हू किमू॒रू पादा॑ उच्येते ॥ १० ॥

ब्रा॒ह्म॒णो॒ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्यः॒ कृतः ।
ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ प॒द्भ्याꣳ॑ शू॒द्रो अ॑जायत ॥ ११ ॥

च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒ः सूर्यो॑ अजायत ।
श्रोत्रा॑द्वा॒युश्च॑ प्रा॒णश्च॒ मुखा॑द॒ग्निर॑जायत ॥ १२ ॥

नाभ्या॑ आसीद॒न्तरि॑क्षꣳ शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॒त्तथा॑ लो॒काँ अ॑कल्पयन् ॥ १३ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

**॥ उत्तरनारायणानुवाकः ॥** (Uttara-Naaraayana Anuvaaka)

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेवं विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥

यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्योजातो नमो रुचाय ब्राह्मये ॥ २० ॥

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ २१ ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं मनिषाण सर्वलोकं म इषाण ॥ २२ ॥

इति उत्तरनारायणानुवाकः ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## Shri Sukta

### श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणं अहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः ॥ ६ ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मिं राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥

क्षुत्पिपासामलां ज्येष्ठाम् अलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान् निर्णुद मे गृहात् ॥ ८ ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरींगुं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥

मनसः काममाकूतिं वाचस्सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेम मालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गळां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीम॑नपगा॒मिनी᳚म् ।
प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा᳚न् वि॒न्देयं॒ पुरु॑षान॒हम् ॥ १५ ॥

यः शुचि॒ः प्रय॑तो भू॒त्वा जु॒हुया॑दाज्य॒मन्व॑हम् ।
सूक्तं॑ प॒ञ्चद॑शर्चं॒ च श्री॒ कामं॑ सत॒तं जं॑पेत् ॥ १६ ॥

पद्मं॑प्रिये पद्मिनि पद्म॒हस्ते पद्मा॑लये पद्मदलाय॑ताक्षि ।
विश्वं॑प्रिये॒ विष्णु मनो॑ऽनुकू॒ले त्वत्पा॑द प॒द्मं मयि॒ सन्निं॑धत्स्व ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## Vishnu Sukta

(Rgveda, Shaakala Samhita, Mandala 1, Sukta 154)

### विष्णुसूक्तम्

विष्णो॒र्नु कं॑ वी॒र्या॑णि॒ प्र वो॑चं॒ यः पार्थि॑वानि विम॒मे रजां॑सि ।
यो अस्क॑भाय॒दुत्त॑रं स॒धस्थं॑ विचक्रमा॒णस्त्रे॒धोरु॑गा॒यः ॥ १ ॥

प्र तद्विष्णु॑: स्तवते वी॒र्ये॑ण मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः ।
यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेष्वधिक्षि॒यन्ति॒ भुव॑नानि॒ विश्वा॑ ॥ २ ॥

प्र विष्ण॑वे शू॒षमे॑तु॒ मन्म॑ गिरि॒क्षित॑ उरुगा॒याय॒ वृष्णे॑ ।
य इ॒दं दी॒र्घं प्रय॑तं स॒धस्थ॒मेको॑ विम॒मे त्रि॒भिरित्प॒देभि॑: ॥ ३ ॥

यस्य॒ त्री पू॒र्णा मधु॑ना प॒दान्यक्षी॑यमाणा स्व॒धया॒ मद॑न्ति ।
य उ॑ त्रि॒धातु॑ पृथि॒वीमु॒त द्यामेको॑ दा॒धार॒ भुव॑नानि॒ विश्वा॑ ॥ ४ ॥

तद॑स्य प्रि॒यम॒भि पाथो॑ अश्यां॒ नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति ।
उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था विष्णो॑: प॒दे प॑र॒मे मध्व॒ उत्स॑: ॥ ५ ॥

ता वां॒ वास्तू॑न्युश्मसि॒ गम॑ध्यै॒ यत्र॒ गावो॒ भूरि॑शृङ्गा अ॒यास॑: ।
अत्राह॒ तदु॑रुगा॒यस्य॒ वृष्ण॑: पर॒मं प॒दमव॑ भाति॒ भूरि॑ ॥ ६ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## Devi Sukta

(Rgveda, Shaakala Samhita, Mandala 10, Sukta 125)

### देवीसूक्तम्

अ॒हं रु॒द्रेभि॒र्वसु॑भिश्चराम्य॒हमा॑दि॒त्यैरु॒त वि॒श्वदे॑वैः ।
अ॒हं मि॒त्रावरु॑णो॒भा बि॑भर्म्य॒हमि॑न्द्रा॒ग्नी अ॒हम॒श्विनो॒भा ॥ १ ॥

अ॒हं सोम॑माह॒नसं॑ बिभर्म्य॒हं त्वष्टा॑रमु॒त पू॒षणं॒ भग॑म् ।
अ॒हं द॑धामि॒ द्रवि॑णं ह॒विष्म॑ते सुप्रा॒व्ये॑◌॒ यज॑मानाय सुन्व॒ते ॥ २ ॥

अ॒हं राष्ट्री॑ सं॒गम॑नी॒ वसू॑नां चिकि॒तुषी॑ प्रथ॒मा य॒ज्ञिया॑नाम् ।
तां मा॑ दे॒वा व्य॑दधुः पुरु॒त्रा भूरि॑स्थात्रां॒ भूर्य॑वि॒शय॑न्तीम् ॥ ३ ॥

मया॒ सो अन्न॑मत्ति॒ यो वि॒पश्य॑ति॒ यः प्राणि॑ति॒ य ईं॑ शृ॒णोत्यु॒क्तम् ।
अ॒म॒न्तवो॒ मां त उप॑ क्षियन्ति श्रु॒धि श्रु॑त श्र॒द्धिवं॑ ते॑ वदामि ॥ ४ ॥

अ॒हमे॒व स्व॒यमि॒दं व॑दामि॒ जुष्टं॑ दे॒वेभि॑रु॒त मानु॑षेभिः ।
यं का॒मये॒ तंत॑मु॒ग्रं कृ॑णोमि॒ तं ब्र॒ह्माणं॒ तमृषिं॒ तं सु॑मे॒धाम् ॥ ५ ॥

अ॒हं रु॒द्राय॒ धनु॒रा त॑नोमि ब्रह्म॒द्विषे॒ शर॑वे॒ हन्त॒वा उं॑ ।
अ॒हं जना॑य स॒मदं॑ कृणोम्य॒हं द्यावा॑पृथि॒वी आ वि॑वेश ॥ ६ ॥

अ॒हं सु॑वे पि॒तर॑मस्य मू॒र्धन्मम॒ योनि॑र॒प्स्व॒न्तः स॑मु॒द्रे ।
ततो॒ वि ति॑ष्ठे॒ भुव॒नानु॒ विश्वो॒तामूं द्यां व॒र्ष्मणोप॑ स्पृशामि ॥ ७ ॥

अ॒हमे॒व वात॑ इव॒ प्र वा॑म्या॒रभ॑माणा॒ भुव॑नानि॒ विश्वा॑ ।
प॒रो दि॒वा प॒र ए॒ना पृ॑थि॒व्यैताव॑ती महि॒ना सं ब॑भूव ॥ ८ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# Manyu Sukta

(Rgveda, Shaakala Samhita, Mandala 10, Suktas 83-84)

## मन्युसूक्तम्

(सूक्त ८३)

यस्ते॑ म॒न्योऽवि॑धद्वज्र साय॒क सह॒ ओज॑ः पुष्यति॒ विश्व॑मानु॒षक् ।
सा॒ह्याम॒ दास॒मार्य॒ं त्वया॑ यु॒जा सह॑स्कृतेन॒ सह॑सा॒ सह॑स्वता ॥ १ ॥

म॒न्युरिन्द्रो॑ म॒न्युरे॒वास॑ दे॒वो म॒न्युर्होता॒॑ वरु॑णो जा॒तवे॑दाः ।
म॒न्युं विश॑ ईळते॒ मानु॑षी॒र्याः पा॒हि नो॑ मन्यो॒ तप॑सा स॒जोषा॑ः ॥ २ ॥

अ॒भी॑हि मन्यो त॒वस॒स्तवी॑या॒न्तप॑सा यु॒जा वि ज॑हि॒ शत्रू॑न् ।
अ॒मि॒त्र॒हा वृ॑त्र॒हा द॑स्यु॒हा च॒ विश्वा॒ वसू॒न्या भ॑रा॒ त्वं न॑ः ॥ ३ ॥

त्वं हि म॑न्यो अ॒भिभू॑त्योजाः स्वय॒म्भूर्भामो॑ अभिमातिषा॒हः ।
वि॒श्वच॑र्षणि॒ः सहु॑रि॒ः सहा॑वान॒स्मास्वोज॒ः पृत॑नासु धेहि ॥ ४ ॥

अ॒भा॒गः सन्नप॒ परे॑तो अस्मि॒ तव॒ क्रत्वा॑ तवि॒षस्य॑ प्रचेतः ।
तं त्वा॑ मन्यो अक्र॒तुर्जि॑हीळा॒हं स्वा त॒नूर्ब॑ल॒देया॑य॒ मेहि॑ ॥ ५ ॥

अ॒यं ते॑ अ॒स्म्युप॒ मेह्य॒र्वाङ्प्र॑तीची॒नः स॑हुरे विश्वधायः ।
मन्यो॑ वज्रिन्न॒भि मामा व॑वृत्स्व॒ हना॑व॒ दस्यू॑ँरु॒त बो॑ध्या॒पेः ॥ ६ ॥

अ॒भि प्रेहि॑ दक्षिण॒तो भ॑वा॒ मेऽधा॑ वृ॒त्राणि॑ जङ्घनाव॒ भूरि॑ ।
जु॒होमि॑ ते ध॒रुण॒ं मध्वो॒ अग्र॑मु॒भा उ॑पा॒ंशु प्र॑थ॒मा पि॑बाव ॥ ७ ॥

(सूक्त ८४)

त्वया॑ मन्यो स॒रथ॑मारु॒जन्तो॒ हर्ष॑माणासो धृषि॒ता म॑रुत्वः ।
ति॒ग्मेष॑व॒ आयु॑धा स॒ंशिशा॑ना अ॒भि प्र य॑न्तु॒ नरो॑ अ॒ग्निरू॑पाः ॥ ८ ॥

अ॒ग्निरि॑व मन्यो त्विषि॒तः स॑हस्व सेना॒नीर्न॑ः सहुरे हू॒त ए॑धि ।
ह॒त्वाय॒ शत्रू॒न्वि भ॑जस्व॒ वेद॒ ओजो॒ मिमा॑नो॒ वि मृधो॑ नुदस्व ॥ ९ ॥

सह॑स्व मन्यो अ॒भिमा॑तिम॒स्मे रु॒जन्मृ॒णन्प्र॑मृ॒णन्प्रेहि॒ शत्रू॑न् ।
उ॒ग्रं ते॒ पाजो॑ न॒न्वा रु॑रुध्रे व॒शी वश॑ं नयस एकज॒ त्वम् ॥ १० ॥

एको॑ ब॒हूना॑मसि मन्यवीळि॒तो विश॑ंविशं यु॒धये॒ सं शि॑शाधि ।
अकृ॑त्तरु॒क्त्वया॑ यु॒जा व॒यं द्यु॒मन्त॒ं घोष॑ं विज॒याय॑ कृण्महे ॥ ११ ॥

वि॒जे॒ष॒कृदिन्द्र॑ इवानवब्र॒वो॒॒ऽस्माकं॑ मन्यो अधि॒पा भ॑वे॒ह ।
प्रि॒यं ते॒ नाम॑ सहुरे गृणीमसि वि॒द्मा तमु॒त्सं यत॑ आब॒भूथ॑ ॥ १२ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

आभू॑त्या सह॒जा व॑ज्र सायक॒ सहो॑ बिभर्ष्यभिभूत॒ उत्त॑रम् ।
क्रत्वा॑ नो मन्यो स॒ह मे॒द्ये॑धि महाध॒नस्य॑ पुरुहूत सं॒सृजि॑ ॥ १३ ॥

संसृ॑ष्टं॒ धन॑मु॒भयं॑ स॒माकृ॑तम॒स्मभ्यं॑ दत्तां॒ वरु॑णश्च म॒न्युः ।
भियं॒ दधा॑ना॒ हृद॑येषु॒ शत्र॑व॒: परा॑जितासो॒ अप॒ नि ल॑यन्ताम् ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## Balittha Sukta

(Rgveda, Shaakala Samhita, Mandala 1, Sukta 141)

### बळित्थासूक्तम्

बळि॒त्था तद्वपु॑षे धायि दर्श॒तं दे॒वस्य॒ भर्ग॒ः सह॑सो॒ यतो॒ जनि॑ ।
यदी॒मुप॒ ह्वर॑ते॒ साध॑ते म॒तिर्ऋ॒तस्य॒ धेना॑ अनयन्त स॒स्रुत॑ः ॥ १ ॥

पृ॒क्षो वपु॑ः पितु॒मान्नित्य॒ आ श॑ये द्वि॒तीय॒मा स॒प्तशि॑वासु मा॒तृषु॑ ।
तृ॒तीय॑मस्य वृष॒भस्य॑ दो॒हसे॒ दश॑प्रमतिं जनयन्त॒ योष॑णः ॥ २ ॥

निर्यदीं॑ बु॒ध्नान्म॑हि॒षस्य॒ वर्प॑स ईशा॒नास॒ः शव॑सा॒ क्रन्त॑ सू॒रय॑ः ।
यदी॒मनु॑ प्र॒दिवो॒ मध्व॑ आध॒वे गुहा॒ सन्तं॑ मात॒रिश्वा॑ मथा॒यति॑ ॥ ३ ॥

प्र यत्पि॒तुः प॑र॒मान्नी॒यते॒ पर्या पृ॒क्षुधो॑ वी॒रुधो॒ दंसु॑ रोहति ।
उ॒भा यद॑स्य ज॒नुषं॒ यदिन्व॑त॒ आदिद्यवि॑ष्ठो अभवद्घृ॒णा शुचि॑ः ॥ ४ ॥

आदिन्मा॒तृरावि॑श॒द्यास्वा शुचि॒रहिं॑स्यमान उर्वि॒या वि वा॑वृधे ।
अनु॒ यत्पूर्वा॒ अरु॑हत्सना॒जुवो॒ नि नव्य॑सी॒ष्वव॑रासु धावते ॥ ५ ॥

आदिद्धोता॑रं वृणते॒ दिवि॑ष्टिषु॒ भग॑मिव पपृचा॒नास॑ ऋञ्जते ।
दे॒वान्यत्क्रत्वा॑ म॒ज्मना॑ पुरुष्टु॒तो मर्तं॒ शंसं॑ वि॒श्वधा॒ वेति॒ धाय॑से ॥ ६ ॥

वि यदस्था॑द्यज॒तो वात॑चोदितो ह्वा॒रो न वक्वा॑ ज॒रणा॒ अना॑कृतः ।
तस्य॒ पत्म॑न्द॒क्षुष॑ः कृ॒ष्णज॑ंहस॒ः शुचि॑जन्मनो॒ रज॒ आ व्य॑ध्वनः ॥ ७ ॥

रथो॒ न या॒तः शिक्व॑भिः कृ॒तो द्यामङ्गे॑भिररु॒षेभि॑रीयते ।
आद॑स्य॒ ते कृ॒ष्णासो॑ दक्षि सू॒रय॒ः शूर॑स्येव त्वे॒षथा॑दीषते॒ वय॑ः ॥ ८ ॥

त्वया॒ ह्य॑ग्ने॒ वरु॑णो धृ॒तव्र॑तो मि॒त्रः शा॑श॒द्रे अ॑र्य॒मा सु॒दान॑वः ।
यत्सी॒मनु॒ क्रतु॑ना वि॒श्वथा॑ वि॒भुर॒रान्न ने॒मिः प॑रि॒भूरजा॑यथाः ॥ ९ ॥

त्वम॑ग्ने शशमा॒नाय॑ सुन्व॒ते रत्नं॑ यविष्ठ दे॒वता॑तिमिन्वसि ।
तं त्वा॒ नु नव्यं॑ सहसो युवन्व॒यं भगं॒ न का॒रे म॑हिरत्न धीमहि ॥ १० ॥

अ॒स्मे र॒यिं न स्वर्थं॒ दमू॑नसं॒ भगं॒ दक्षं॒ न प॑पृचासि धर्ण॒सिम् ।
र॒श्मीँरि॑व॒ यो यम॑ति॒ जन्म॑नी उ॒भे दे॒वानां॒ शंस॑मृ॒त आ च॑ सु॒क्रतु॑ः ॥ ११ ॥

उ॒त न॑ः सु॒द्योत्मा॑ जी॒राश्वो॒ होता॑ म॒न्द्रः शृण॑वच्च॒न्द्ररथः ।
स नो॑ नेष॒न्नेष॑तमै॒रमू॑रो॒ऽग्निर्वा॒मं सु॑वि॒तं वस्यो॒ अच्छ॑ ॥ १२ ॥

अस्ता॑व्य॒ग्निः शिमी॑वद्भिर॒र्कैः साम्रा॑ज्याय प्र॒तरं॒ दधा॑नः ।
अ॒मी च॒ ये म॒घवा॑नो व॒यं च॒ मिहं॒ न सूरो॒ अति॒ निष्ट॑तन्युः ॥ १३ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 3. The Dvaadasha Stotras of Shri Madhvaachaarya



## Introduction

The Dvaadasha Stotras are a set of 12 Stotras composed by Shripaada Madhvacharya, praising Shri Lakshmi Naaraayana. For a long time, one set of the Dvaadasha Stotras were known. However, during recent times, this recension was discovered and obtained from a 700-year-old manuscript of Shrimat Aachaarya’s Sarvamula granthas, written by his direct disciple, Shri Hrsheekesha Teertharu. This contains an entire extra Stotra and is the third one in this section. The Stotra is ended by a combination of two Gaayatri Chhandas, equivalent to one and a half Anushtup Chhandas. Anustup Chhanda refers to a set of 32 letters, while Gaayatri Chhanda is a set of 24 letters. The complete form of the Stotra and that it contains 15 shlokas, was confirmed through the 300 and 150-year-old manuscripts of

© Copyrights 2022-26 Achyuta Bhakti Deets

Shri Raghupriya Teertharu and Shri Raghuratna Teertharu respectively, who were both Yatis of Shri Palimaaru Matha.

This Stotra additionally has klishta pada prayoga, i.e. making use of complex words, which need to be deciphered with good knowledge of the Shaastras, in contrast to the the other Dvaadasha Stotras, which have sulalita pada prayoga, making their vocabulary and language easily comprehensible for those with good knowledge of Samskrta. This particular Stotra especially describes different rupas of Shri Naaraayana, due to which knowledge of Tantrasaara Sangraha is recommended to understand its meaning deeply. In the original manuscript of the Dvaadasha Stotras of Shri Hrsheekesha Teertharu, there are changes in the order of the Stotras and two of them have been merged. This was not available during later times, due to which these facts were unknown to later bhaashyakaras and the currently well-known version of the Dvaadasha Stotras differs. Additionally, the Narasimha Nakha Stuti too occurs as one of the Dvaadasha Stotras, as the fifth one, though previously believed to have been a separate work of Shrimat Aachaarya.

© Copyrights 2022-26 Achyuta Bhakti Deets

# ॥ द्वादश स्तोत्राणि ॥

### अथ प्रथमस्तोत्रम् (श्रीस्तुतिः)

विश्वस्थितिप्रळयसर्गमहाविभूति वृत्तिप्रकाशनियमावृति बन्धमोक्षाः ।
यस्या अपाङ्गलवमात्रत ऊर्जिता सा श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ १ ॥

ब्रह्मेशशक्ररविधर्मशशाङ्कपूर्व गीर्वाणसन्ततिरियं यदपाङ्गलेशम् ।
आश्रित्य विश्वविजयं विसृजत्यचिन्त्या श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ २ ॥

धर्मार्थकामसुमतिप्रचयाद्यशेषसन्मङ्गलं विदधते यदपाङ्गलेशम् ।
आश्रित्य तत्प्रणतसत्प्रणता अपीड्या श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ३ ॥

षड्वर्गनिग्रहनिरस्तसमस्तदोषा ध्यायन्ति विष्णुमृषयो यदपाङ्गलेशम् ।
आश्रित्य यानपि समेत्य न याति दुःखं श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ४ ॥

शेषाहिवैरिशिवशक्रमनुप्रधान चित्रोरुकर्मरचनं यदपाङ्गलेशम् ।
आश्रित्य विश्वमखिलं विदधाति धाता श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ५ ॥

शक्रोग्रदीधितिहिमाकरसूर्यसूनु पूर्वं निहत्य निखिलं यदपाङ्गलेशम् ।
आश्रित्य नृत्यति शिवः प्रकटोरुशक्तिः श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ६ ॥

तत्पादपङ्कजमहासनतामवाप शर्वादिवन्द्यचरणो यदपाङ्गलेशम् ।
आश्रित्य नागपतिः अन्यसुरैर्दुरापां श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ७ ॥

नागारिरुग्रबलपौरुष आप विष्णुवाहत्वमुत्तमजवो यदपाङ्गलेशम् ।
आश्रित्य शक्रमुखदेवगणैः अचिन्त्यं श्रीर्यत्कटाक्षबलवत्यजितं नमामि ॥ ८ ॥

आनन्दतीर्थमुनिसन्मुखपङ्कजोत्थं साक्षाद्रमाहरिमनः प्रियमुत्तमार्थम् ।
भक्त्या पठत्यजितमात्मनि सन्निधाय यः स्तोत्रमेतभियाति तयोरभीष्टम् ॥ ९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृता श्रीस्तुतिः समाप्ता ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ द्वितीयस्तोत्रम्**

वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्जनम् ।
इन्दिरापतिमाद्यादि वरदेश वरप्रदम् ॥ १ ॥

नमामि निखिलाधीश किरीटाघृष्टपीठवत् ।
हृत्तमश्शमनेऽर्काभं श्रीपतेः पादपङ्कजम् ॥ २ ॥

जाम्बूनदाम्बराधारं नितम्बं चिन्त्यमीशितुः ।
स्वर्णमञ्जीरसंवीतं आरूढं जगदम्बया ॥ ३ ॥

उदरं चिन्त्यं ईशस्य तनुत्वेऽपि अखिलम्भरम् ।
वलित्रयाङ्कितं नित्यं आरूढं श्रियैकया ॥ ४ ॥

स्मरणीयमुरो विष्णोरिन्दिरावासमुत्तमैः ।
अनन्तं अन्तवदिव भुजयोरन्तरङ्गतम् ॥ ५ ॥

शङ्खचक्रगदापद्मधराश्चिन्त्या हरेर्भुजाः ।
पीनवृत्ता जगद्रक्षा केवलोद्योगिनोऽनिशम् ॥ ६ ॥

सन्ततं चिन्तयेत्कण्ठं भास्वत्कौस्तुभभासकम् ।
वैकुण्ठस्याखिला वेदा उद्गीर्यन्तेऽनिशं यतः ॥ ७ ॥

स्मरेत यामिनीनाथ सहस्रामितकान्तिमत् ।
भवतापापनोदीड्यं श्रीपतेः मुखपङ्कजम् ॥ ८ ॥

पूर्णान्यसुखोद्भासिं अन्दस्मितमधीशितुः ।
गोविन्दस्य सदा चिन्त्यं नित्यानन्दपदप्रदम् ॥ ९ ॥

स्मरामि भवसन्ताप हानिदामृतसागरम् ।
पूर्णानन्दस्य रामस्य सानुरागावलोकनम् ॥ १० ॥

ध्यायेदजस्रमीशस्य पद्मजादिप्रतीक्षितम् ।
भ्रूभङ्गं पारमेष्ठ्यादि पददायि विमुक्तिदम् ॥ ११ ॥

सन्ततं चिन्तयेऽनन्तमन्तकाले विशेषतः ।
नैवोदापुः गृणन्तोऽन्तं यद्गुणानां अजादयः ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु द्वितीयस्तोत्रं सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ तृतीयस्तोत्रम्**

शङ्खचक्रगदापद्मशार्ङ्गखड्गधरं सदा ।
नमामि पितरं नित्य वासुदेवं जगत् पतिम् ॥ १ ॥

सच्चिदानन्दरूपं तमनामयमनन्तरम् ।
एकमेकान्तमभयं विष्णुं विश्वहृदि स्थितम् ॥ २ ॥

नानास्वभावमत्यन्तस्वभावेन विचारितम् ।
अविशेषमनाद्यन्तं प्रणमामि सनातनम् ॥ ३ ॥

कुन्देन्दुसन्निभं वन्दे सुधारसनिभं विभुम् ।
ज्ञानमुद्रापुस्तकारिशङ्खाक्षायुधधारिणम् ॥ ४ ॥

आनन्दमजरं नित्यमात्मेशममितद्युतिम् ।
वन्दे विश्वस्य पितरं विष्णुं विश्वेश्वरं सदा ॥ ५ ॥

अमन्दानन्दसन्दोहसन्तोषितजगत्रयम् ।
नारायणमणीयांसं वन्दे देवं सदातनम् ॥ ६ ॥

सूर्यमण्डलमद्ध्यस्थं वराभयकरोद्यतम् ।
सूर्यामितद्युतिं वन्दे नारायणमनामयम् ॥ ७ ॥

विश्वं विश्वाकरं वन्दे विश्वस्य प्रपितामहम् ।
नानारूपमजं नित्यं विश्वात्मानं प्रजापतिम् ॥ ८ ॥

कालाकालविचारादिप्रकालितसदातनम् ।
पुरुषं प्रकृतिस्थं च वन्दे विष्णुमजोत्तमम् ॥ ९ ॥

ब्रह्मणः पितरं वन्दे शङ्करस्य पितामहम् ।
श्रियः पतिमजं नित्यमिन्द्रादिप्रपितामहम् ॥ १० ॥

प्रतिप्रति स्थितं विष्णुं नित्यामृतमनामयम् ।
शङ्खचक्रधरं वन्दे वराभयकरोद्यतम् ॥ ११ ॥

प्रतापप्रविशेषेण दूरीकृतविदूषणम् ।
विदारितारिमत्यन्तप्रसन्नं प्रणमाम्यहम् ॥ १२ ॥

अप्रमेयमजं नित्यं विशालममृतं परम् ।
कृतनित्यालयं लोके नमस्यामि जगत् पतिम् ॥ १३ ॥

सुनित्यसुखमक्षय्यं शुद्धं शान्तं निरञ्जनम् ।
लोकालोकविचाराढ्यं नमस्यामि श्रियःपतिम् ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

अमन्दानन्दसन्दोहसान्द्रमिन्द्रानुजं परम् ।
नित्यावदातमेकान्तं प्रमाणातीतमक्षयम् ।
लोकालोकपतिं दिव्यं नमस्यामि रमापतिम् ॥ १५ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं द्वादशस्तोत्रेषु तृतीयस्तोत्रम् सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## अथ चतुर्थस्तोत्रम् (हरिस्तुतिः)

कुरु भुङ्क्ष्व च कर्म निजं नियतं हरिपादविनम्रधिया सततम् ।
हरिरेव परो हरिरेव गुरुः हरिरेव जगत्पितृमातृगतिः ॥ १ ॥

न ततोऽस्त्यपरं जगदीड्यतमं जगतीड्यतमं परमात्परतः पुरुषोत्तमतः ।
तदलं बहुलोकविचिन्तनया प्रवणं कुरु मानसमीशपदे ॥ २ ॥

यततोऽपि हरेः पदसंस्मरणे सकलं ह्यघमाशु लयं व्रजति ।
स्मरतस्तु विमुक्तिपदं परमं स्फुटमेष्यति तत्किमपाक्रियते ॥ ३ ॥

शृणुतामलसत्यवचः परमं शपथेरितं उच्छ्रितबाहुयुगम् ।
न हरेः परमो न हरेः सदृशः परमः स तु सर्व चिदात्मगणात् ॥ ४ ॥

यदि नाम परो न भवेत हरिः कथमस्य वशे जगदेतदभूत् ।
यदि नाम न तस्य वशे सकलं कथमेव तु नित्यसुखं न भवेत् ॥ ५ ॥

न च कर्मविमामल कालगुणप्रभृतीशमचित्तनु तद्धि यतः ।
चिदचित्तनु सर्वमसौ तु हरिर्यमयेदिति वैदिकमस्ति वचः ॥ ६ ॥

व्यवहारभिदाऽपि गुरोर्जगतां न तु चित्तगता स हि चोद्यपरम् ।
बहवः पुरुषाः पुरुषप्रवरो हरिरित्यवदत्स्वयमेव हरिः ॥ ७ ॥

चतुराननपूर्वविमुक्तगणा हरिमेत्य तु पूर्ववदेव सदा ।
नियतोच्चविनीचतयैव निजां स्थितिमापुरिति स्म परं वचनम् ॥ ८ ॥

आनन्दतीर्थसन्नाम्ना पूर्णप्रज्ञाभिधायुजा ।
कृतं हर्यष्टकं भक्त्या पठतः प्रीयते हरिः ॥ ९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु चतुर्थस्तोत्रम् सम्पूर्णम् ॥

[हरिस्तुतिः समाप्ता ।]

© Copyrights 2022-26 Achyuta Bhakti Deets

## Shri Nrsimha Nakha Stuti



**अथ पञ्चमस्तोत्रम् (श्रीनृसिंहनखरस्तुतिः)**

ॐ ॥ रामोऽखिलानन्दतनुः स एव भीमोऽतिपापेषु दुरन्तवीर्यः ।
कामः स एवाजितकामिनीषु सोमः स एवाऽत्मपदाश्रितेषु ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

पान्त्वस्मान् पुरुहूतवैरिबलवन्मातङ्गमाद्यद्घटाकुम्भोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कण्ठीरवास्यप्रततसुनखरा दारितारातिदूर प्रध्वस्तध्वान्तशान्तप्रविततमनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकान्त समन्ततोऽपि कलयन् नैवेशितुस्ते समं पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरत्खद्योतोपमविस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृता श्रीनृसिंहनखरस्तुतिः समाप्ता ॥

om || raamo'khilaanandatanuhu sa eva bheemo'tipaapeshu durantaveeryaha |
kaamaha sa evaajitakaamineeshu somaha sa evaa'tmapadaashriteshu ||

paantvasmaan puruhootavairibalavanmaatangamaadyadghataakumbhochchaadrivipaatanaadhikapatupratyekavajraayitaaha |
shreematkantheeravaasyapratatasunakharaa daaritaaraatidoora pradhvastadhvaantashaantapravitatamanasaa bhaavitaa bhooribhaagaih || 1 ||

lakshmeekaanta samantato'pi kalayan naiveshituste samam pashyaamyuttamavastu dooratarato'paastam raso yo'shtamaha |
yadroshotkaradakshanetrakutilapraantotthitaagnisphuratkhadyotopamavisphulingabhasitaa brahmeshashakrotkaraaha || 2 ||

iti shreemadaanandateerthabhagavatpaadaachaaryakrtaa shreenrsimhanakharastutihi samaaptaa ||

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ षष्ठस्तोत्रम्**

वन्दिताशेषवन्द्योरुवृन्दारकं चन्दनाचर्चितोदारपीनांसकम् ।
इन्दिराचञ्चलापाङ्गनीराजितं मन्दरोद्धारिवृत्तोद्भुजाभोगिनम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ १ ॥

सृष्टिसंहारलीलाविलासाततं पुष्टषाड्गुण्यसद्विग्रहोल्लासिनम् ।
दुष्टनिःशेषसंहारकर्मोद्यतं हृष्टपुष्टातिशिष्ट प्रजासंश्रयम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ २ ॥

उन्नतप्रार्थिताशेषसंसाधकं सन्नतालौकिकानन्ददश्रीपदम् ।
भिन्नकर्माशयप्राणिसम्प्रेरकं तन्न किं नेति विद्वत्सु मीमांसितम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ३ ॥

विप्रमुख्यैः सदा वेदवादोन्मुखैः सुप्रतापैः क्षितीशेश्वरैश्चार्च्चितम् ।
अप्रतर्क्योरुसंविद्गुणं निर्मलं सप्रकाशाजरानन्दरूपं परम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ४ ॥

अत्ययो यस्य केनापि न क्वापि हि प्रत्ययो यद्गुणेषूत्तमानां परः ।
सत्यसङ्कल्प एको वरेण्यो वशी मत्यनूनैः सदा वेदवादोदितः ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ५ ॥

पश्यतां दुःखसन्ताननिर्मूलनं दृश्यतां दृश्यतामित्यजेशार्चितम् ।
नश्यतां दूरगं सर्वदाप्याऽत्मगं वश्यतां स्वेच्छया सज्जनेष्वागतम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ६ ॥

अग्रजं यः ससर्जाजमग्र्याकृतिं विग्रहो यस्य सर्वे गुणा एव हि ।
उग्र आद्योऽपि यस्यात्मजाग्र्यात्मजः सद्गृहीतः सदा यः परं दैवतम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ७ ॥

अच्युतो यो गुणैर्नित्यमेवाखिलैः प्रच्युतोऽशेषदोषैः सदा पूर्तितः ।
उच्यते सर्ववेदोरुवादैरजः स्वर्चितो ब्रह्मरुद्रेन्द्रपूर्वैः सदा ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ८ ॥

धार्यते येन विश्वं सदाजादिकं वार्यतेऽशेषदुःखं निजध्यायिनाम् ।
पार्यते सर्वमन्यैर्नयत्पार्यते कार्यते चाखिलं सर्वभूतैः सदा ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ९ ॥

सर्वपापानियत्संस्मृतेः सङ्क्षयं सर्वदा यान्ति भक्त्या विशुद्धात्मनाम् ।
शर्वगुर्वादिगीर्वाण संस्थानदः कुर्वते कर्म यत्प्रीतये सज्जनाः ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ १० ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

अक्षयं कर्म यस्मिन् परे स्वर्पितं प्रक्षयं यान्ति दुःखानि यन्नामतः ।
अक्षरो योऽजरः सर्वदैवामृतः कुक्षिगं यस्य विश्वं सदाऽजादिकम् ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ ११ ॥

नन्दितीर्थोरुसन्नामिनो नन्दिनः सन्दधानाः सदानन्ददेवे मतिम् ।
मन्दहासारुणा पाङ्गदत्तोन्नतिं वन्दिताशेषदेवादिवृन्दं सदा ।
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनं प्रीणयामो वासुदेवम् ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु षष्ठस्तोत्रम् सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ सप्तमस्तोत्रम्**

देवकिनन्दन नन्दकुमारा वृन्दावनाञ्चन गोकुलचन्द्र ॥ १ ॥

कन्दफलाशन सुन्दररूपा नन्दितगोकुल वन्दितपाद ॥ २ ॥

इन्द्रसुतावक नन्दकहस्ता चन्दनचर्च्चित सुन्दरिनाथ ॥ ३ ॥

इन्दीवरोदरदळनयनाऽऽ मन्दरधारा गोविन्द वन्दे ॥ ४ ॥

मत्स्यकरूप लयोदविहारिन् वेदविनेत्र चतुर्मुखवन्द्य ॥ ५ ॥

कूर्मस्वरूपक मन्दरधारिन् लोकविधारक देववरेण्य ॥ ६ ॥

सूकररूपक दानवशत्रो भूमिविधारक यज्ञावराङ्ग ॥ ७ ॥

देव नृसिंह हिरण्यकशत्रो सर्व भयान्तक दैवतबन्धो ॥ ८ ॥

वामन वामन माणववेष दैत्यवरान्तक कारणभूत ॥ ९ ॥

रामभृगूद्वह सूर्जितदीप्ते क्षत्रकुलान्तक शम्भुवरेण्य ॥ १० ॥

राघव राघव राक्षसशत्रो मारुतिवल्लभ जानकिकान्त ॥ ११ ॥

देवकिनन्दन सुन्दररूप रुक्मिणिवल्लभ पाण्डवबन्धो ॥ १२ ॥

दैत्यविमोहक नित्यसुखादे देवविबोधक बुद्धस्वरूप ॥ १३ ॥

दुष्टकुलान्तक कल्किस्वरूपा धर्मविवर्धन मूलयुगादे ॥ १४ ॥

आनन्दतीर्थकृता हरिगाथा पापहरा शुभनित्यसुखार्था ॥ १५ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु सप्तमस्तोत्रम् सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ अष्टमस्तोत्रं**

अतिमततमोगिरिसमितिविभेदन पितामहभूतिद गुणगणनिलय ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १ ॥

विधिभवमुखसुरसततसुवन्दितरमामनोवल्लभ भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ २ ॥

अगणितगुणगणमयशरीर हे विगतगुणेतर भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ३ ॥

अपरिमितसुखनिधिविमलसुदेह हे विगत सुखेतर भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ४ ॥

प्रचलितलयजलविहरण शाश्वतसुखमयमीन हे भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ५ ॥

सुरदितिजसुबलविलुळितमन्दरधर पर कूर्म हे भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ६ ॥

सगिरिवरधरातळवह सुसूकरपरमविबोध हे भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ७ ॥

अतिबलदितिसुत हृदय विभेदन जयनृहरेऽमल भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ८ ॥

बलिमुखदितिसुतविजयविनाशन जगदवनाजित भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ९ ॥

अविजितकुनृपतिसमितिविखण्डन रमावर वीरप भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १० ॥

खरतरनिशिचरदहन परामृत रघुवर मानद भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ ११ ॥

सुललिततनुवर वरद महाबल यदुवर पार्थप भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १२ ॥

दितिसुतविमोहन विमलविबोधन परगुणबुद्ध हे भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १३ ॥

कलिमलहुतवह सुभग महोत्सव शरणद कल्कीश भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

अखिलजनिविलय परसुखकारण परपुरुषोत्तम भव मम शरणम् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १५ ॥

इति तव नुतिवरसततरतेर्भव सुशरणमुरुसुखतीर्थमुनेः भगवन् ।
शुभतम कथाशय परमसदोदित जगदेककारण रामरमारमण ॥ १६ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु अष्टमस्तोत्रं सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ नवमस्तोत्रम्**

केशव केशव शासक वन्दे पाशधरार्चित शूरपरेश ।
नारायणामलतारण वन्दे कारणकारण पूर्ण वरेण्य ॥ १ ॥

माधव माधव शोधक वन्दे बाधक बोधक शुद्धसमाधे ।
गोविन्द गोविन्द पुरन्दर वन्दे स्कन्दसनन्दनवन्दितपाद ॥ २ ॥

विष्णु सृजिष्णु ग्रसिष्णो विवन्दे कृष्ण सदुष्णवधिष्णो सुधृष्णो ।
मधुसूदन दानवसादन वन्दे दैवतमोदन वेदितपाद ॥ ३ ॥

त्रिविक्रम निष्क्रम विक्रम वन्दे सुक्रम सङ्क्रमहुङ्कृतवक्त्र ।
वामन वामन भामन वन्दे सामन सीमन शामन सानो ॥ ४ ॥

श्रीधर श्रीधर शन्धर वन्दे भूर्द्धर वार्द्धर कन्धरधारिन् ।
हृषीकेश सुकेश परेश विवन्दे शरणेश कलेश बलेश सुखेश ॥ ५ ॥

पद्मनाभ शुभोद्भव वन्दे सम्भृतलोकभराभर भूरे ।
दामोदर दूरतरान्तर वन्दे दारितपारक पार परस्मात् ॥ ६ ॥

आनन्दसुतीर्थ मुनीन्द्रकृता हरिगीतिरियं परमादरतः ।
परलोकविलोकन सूर्यनिभा हरिभक्ति विवर्धन शौण्डतमा ॥ ७ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु नवमस्तोत्रं सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ दशमस्तोत्रम्**

अवनश्श्रीपतिरप्रतिरधिकेशादिभवादे ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १ ॥

सुरवन्द्याधिप सद्वरभरिताशेषगुणालम् ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ २ ॥

सकलध्वान्तविनाशन परमानन्दसुधाहो ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ३ ॥

त्रिजगत्पोत सदार्चितचरणाशापतिधातो ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ४ ॥

त्रिगुणातीतविधारक परितो देहि सुभक्तिम् ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ५ ॥

शरणं कारणभावन भव मे तात सदाऽलम् ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ६ ॥

मरणप्राणद पालक जगदीशाव सुभक्तिम् ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ७ ॥

तरुणादित्यसवर्णकचरणाब्जामल कीर्ते ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ८ ॥

सलिलप्रोत्थसरागकमणिवर्णोच्चनखादे ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ९ ॥

कजतूणीनिभपावनवरजङ्घामितशक्ते ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १० ॥

इबहस्तप्रभशोभनपरमोरुस्थरमाळे ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ ११ ॥

असनोत्फुल्लसुपुष्पकसमवर्णावरणान्ते ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १२ ॥

शतमोदोद्भवसुन्दरिवरपद्मोत्थितनाभे ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १३ ॥

जगदागूहकपल्लवसमकुक्षे शरणादे ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

जगदम्बामलसुन्दरिगृहवक्षोवर योगिन् ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १५ ॥

दितिजान्तप्रद चक्रधरगदायुग्वरबाहो ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १६ ॥

परमज्ञानमहानिधिवदन श्रीरमणेन्दो ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १७ ॥

निखिलाघौघविनाशकपरसौख्यप्रददृष्टे ।
करुणापूर्णवरप्रदचरितं ज्ञापय मे ते ॥ १८ ॥

परमानन्दसुतीर्थसुमुनिराजो हरिगाथाम् ।
कृतवान्नित्यसुपूर्णकपरमानन्दपदैषिन् ॥ १९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु दशमस्तोत्रं सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## अथ एकादशस्तोत्रम्

उदीर्णमजरं दिव्यं अमृतस्यन्द्यधीशितुः ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ १ ॥

सर्ववेदपदोद्गीतमिन्दिराधारमुत्तमम् ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ २ ॥

सर्वदेवादिदेवस्य विदारितमहत्तमः ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ ३ ॥

उदारमादरान्नित्यं अनिन्द्यं सुन्दरीपतेः ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ ४ ॥

इन्दीवरोदरनिभं सुपूर्णं वादिमोहनम् ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ ५ ॥

दातृसर्वामरैश्वर्यविमुक्त्यादेरहो वरम् ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ ६ ॥

दूराद्दुरतरं यत्तु तदेवान्तिकमन्तिकात् ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ ७ ॥

पूर्णसर्वगुणैकार्णमनाद्यन्तं सुरेशितुः ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्रादि अभिवन्दितम् ॥ ८ ॥

आनन्दतीर्थमुनिना हरेरानन्दरूपिणः ।
कृतं स्तोत्रमिदं पुण्यं पठन्नानन्दमाप्नुयात् ॥ ९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं द्वादशस्तोत्रेषु एकादशस्तोत्रं सम्पूर्णम् ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

**अथ द्वादशस्तोत्रम्**

आनन्दमुकुन्द अरविन्दनयन ।
आनन्दतीर्थपरानन्दवरद ॥ १ ॥

सुन्दरीमन्दिरगोविन्द वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ २ ॥

चन्द्रकमन्दिरनन्दक वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ३ ॥

चन्द्रसुरेन्द्रसुवन्दित वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ४ ॥

वृन्दारवृन्दसुवन्दित वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ५ ॥

मन्दिरस्यन्दनस्यन्दक वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ६ ॥

इन्दिराऽनन्दक सुन्दर वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ७ ॥

मन्दारस्यन्दितमन्दिर वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ८ ॥

आनन्दचन्द्रिकास्यन्दक वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु द्वादशं स्तोत्रंसम्पूर्णम् ॥

---

॥ श्रीभारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 4. Shri Vishnu Sahasranaama Stotra

## ॥ श्रीविष्णुसहस्रनामस्तोत्रम् ॥



© Copyrights 2022-26 Achyuta Bhakti Deets

## Introduction

The Vishnu Sahasranaama is a Stotra propitiating Shri Vishnu, with 1008 of His names. It is sung by Bheeshma, on the battlefield of Kurukshetra, through the aavesha of Shri Vishnu within his heart, who enabled him to do so. This occurs in the the 254th Adhyaaya of the Anushaasana Parva of the Mahaabhaarata. There are other versions from the Padma Puraana, Skanda Puraana and Garuda Puraana, though the Mahaabhaarata version is the one commented upon by most Aachaaryas. It has the following sections, out of which not all are from the same source:

- **The Purvapeethika**: This is the section just before Bheeshma begins chanting the Stotra, acquainting one with the context of it and why Bheeshma (with the aavesha of Krshna) narrates this Stotra.
- **The Stotra**: This is the actual Stotra which is supposed to be chanted, mentioning 1008 names of Shri Hari. It must be known that Bhagavaan actually has infinite names and is denoted by every sound in the universe, as said in the Shaastras. Shripaada Madhvacharya once mentioned how there are actually a hundred types of meanings of the Vishnu Sahasranaama Stotra and the numerous different interpretations of them.
- **The Uttarapeethika**: This is the continuation of the Mahaabhaarata and the conversation between Yudhishthira and Bheeshma. It mentions the Phalashruti, or benefits of chanting the Vishnu Sahasranaama Stotra, and also includes a few shlokas from other sources, generally chanted after it.

Chanting the Vishnu Sahasranaama invokes Shri Vishnu as our Antaryaami within our Aatma and partially manifests a fraction of His qualities within us. The jeevas, or living entities, can be compared to reflections of Paramaatma. We depend on Him, as we have no separate existence without Him and are subordinate to Him in all respects. However, being His reflection, the jeevas have certain qualities of Eeshvara, in extremely limited amounts, depending on the position of the jeeva in the Taaratamya (hierarchy of beings).

By invoking Paramaatma, who resides within our Aatma, we can partly manifest these qualities, in minor amounts and improve ourselves, especially spiritually. This is the objective of the Vishnu Sahasranaama which extolls the various names of Para Brahma, which indicate certain qualities of His. In fact, Shri Madhvacharya once mentioned in a gathering of many scholars, that the Vishnu Sahasranaama actually contains 100 types of meanings and interpretations. When he started explaining them for just a few of Shri Vishnu's names, the scholars realized they were totally incapable of comprehending Shrimat Aachaarya's explanation, as it was beyond their intellectual capacity. Such is the infinite glory of Bhagavat-naama.

© Copyrights 2022-26 Achyuta Bhakti Deets

## मूलपाठः/पूर्वपीठिका (Mulapaatha/Purvapeethika)

ॐ सकलसौभाग्यदायकं श्रीविष्णुसहस्रनामस्तोत्रम् ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ २ ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ३ ॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ४ ॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ५ ॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ६ ॥

ॐ नमो विष्णवे प्रभविष्णवे ।

श्रीवैशम्पायन उवाच
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ७ ॥

युधिष्ठिर उवाच
किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ ८ ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ९ ॥

भीष्म उवाच
जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन् नामसहस्रेण पुरुषः सततोत्थितः ॥ १० ॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन् स्तुवन् नमस्यंश्च यजमानस्तमेव च ॥ ११ ॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ १२ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ १३ ॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १४ ॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ १५ ॥

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं दैवतानां च भूतानां योऽव्ययः पिता ॥ १६ ॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ १७ ॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १८ ॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १९ ॥

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥ २० ॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियोज्यते ॥ २१ ॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।

© Copyrights 2022-26 Achyuta Bhakti Deets

## न्यास (Nyaasa)

ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ।
श्री भगवान् वेदव्यास ऋषिः ।
अनुष्टुप् छन्दः ।
श्रीमहाविष्णुः परमात्मा अन्तर्यामि देवता । (alternatively श्रीभारतीरमण मुख्यप्राणान्तर्गत श्रीमहाविष्णुः परमात्मा अन्तर्यामि देवता)
श्रीविष्णोर्दिव्यसहस्रनामस्तोत्र पारायणेन विनियोगः ॥

Before chanting a major mantra or stotra, the procedure of Nyaayasa must be performed. A mantra has four main components – the Rshi who composed/learnt it, its Chhandas or chanting style, the Devata invoked by it and its viniyoga or purpose. The chanting of these, such as in the above lines, is known as Nyaasa.

> While mentioning the Rshi (in this case, 'Shri Bhagavaan Veda Vyaasa Rshihi..'), place your right hand on your head. For the Chhandas, place your right hand on your mouth and for the Devata, place your right hand on your chest.

After Nyaasa, the Dhyaana mantra/shloka should be chanted, which is a description of the Devata invoked, to mentally vizualize the form of the Devata.

## ध्यानम् (Dhyaana)

अथ ध्यानम्

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतेर्मौक्तिकानां मालाकॢप्तासनस्थः
स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूष वर्षैः आनन्दी नः पुनीयादरिनलिनगदा शङ्खपाणिर्मुकुन्दः ॥ १ ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्र सूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णुमीशं नमामि ॥ २ ॥

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ३ ॥

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥ ४ ॥

नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ ५ ॥

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् |
सहारवक्षःस्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥ ६ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

छायायां पारिजातस्य हेमसिंहासनोपरि आसीनमम्बुदश्याममायताक्षमलंकृतम् |
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसं रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये ॥ ७ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

## स्तोत्रम् (Stotra)

॥ हरिः ॐ ॥

ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥

स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७ ॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १० ॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११ ॥

वसुर्वसुमनाः सत्यः समात्माऽसम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वत स्थाणुर्वरारोहो महातपाः ॥ १३ ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७ ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २० ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२ ॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५ ॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६ ॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥ २७ ॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३० ॥

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ३३ ॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्त्वतांपतिः ॥ ५४ ॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५ ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७ ॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्करांक्षो महामनाः ॥ ५९ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥ ६२ ॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥

अनिवर्ती निवृत्तात्मा सङ्क्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६४ ॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥ ६५ ॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८ ॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९ ॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ॥ ७० ॥

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५ ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६ ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७ ॥

एको नैकः सवः कः किं यत् तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ७९ ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८० ॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१ ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३ ॥

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥ ८५ ॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९० ॥

भारभृत् कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः ॥ ९२ ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥ ९३ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४ ॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥ ९६ ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७ ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९ ॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १०० ॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १०१ ॥

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२ ॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३ ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १०४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुक् यज्ञसाधनः ।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ॥ १०५ ॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ १०६ ॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः॥ १०७ ॥

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥ १०८ ॥
श्री वासुदेवोऽभिरक्षतु ॐ नम इति ।

सर्वप्रहरणायुध ॐ नम इति ।

© Copyrights 2022-26 Achyuta Bhakti Deets

## उत्तरन्यासः/उत्तरपीठिका (Uttaranyaasa/Uttarapeethika)

भीष्म उवाच
इतीदं कीर्तनीयस्य केशवस्य महात्मनः।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ १ ॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥ २ ॥

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ ३ ॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम् ॥ ४ ॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ ५ ॥

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ ६ ॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ७ ॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ८ ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ ९ ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १० ॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११ ॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥ १२ ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृत पुण्यानां भक्तानां पुरुषोत्तमे ॥ १३ ॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १५ ॥

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १६ ॥

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १७ ॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ १८ ॥

योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ १९ ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ २० ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २१ ॥

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ २२ ॥

न ते यान्ति पराभवम ॐ नम इति ।

अर्जुन उवाच
पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २३ ॥

श्रीभगवानुवाच
यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव ।
सोऽहमेकेन श्लोकेन स्तुत एव न संशयः ॥ २४ ॥

स्तुत एव न संशय ॐ नम इति ।

व्यास उवाच
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ २५ ॥
श्री वासुदेव नमोऽस्तुत ॐ नम इति ।

पार्वत्युवाच
केनोपायेन लघुना विष्णोर्नामसहस्रकम ।
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ॥ २६ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

ईश्वर उवाच
श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं राम नाम वरानने ॥ २७ ॥
श्रीरामनाम वरानन ॐ नम इति ।

ब्रह्मोवाच
नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि युगधारिणे नमः ॥ २८ ॥
सहस्रकोटि युगधारिणे ॐ नम इति ।

सञ्जय उवाच
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ २९ ॥

श्रीभगवानुवाच
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ३० ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ३१ ॥

आर्ताः विषण्णाशिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति ॥ ३२ ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ ३३ ॥

इति श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं सम्पूर्णम् ॥

---

॥ श्रीभारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 5. Shri Vishnu Stuti of Shri Trivikrama Panditaachaarya

This Stuti, along with Shri Trivikrama Panditaachaarya's Vaayu Stuti, Shrimat Aachaarya's Narasimha Nakhara Stuti and Shri Naaraayana Panditaachaarya's Narasimha and Shiva Stutis, are known as the 'Pancha Stutis'. Ideally, all Maadhvas must chant these five Stutis everyday.

**॥ श्रीविष्णुस्तुतिः ॥**

श्रीमध्वसंसेवितपादपद्मं रुद्रादिदेवैः परिसेव्यमानम् ।
ऋष्यादिभिर्वेदपथैः सुगेयं कथं नु पश्येयममोघवीर्यम् ॥ १ ॥

हृन्मन्दिरे सुन्दररत्नपीठे लक्ष्म्यात्मके सारतरे निविष्टम् ।
श्रीभूसमाश्लिष्टतनुं तथाऽपि पूर्णं निजानन्दमयं परेशम् ॥ २ ॥

अनन्तपूर्णेन्दुकिरीटशोभितं सुनीलस्निग्धालकशोभिसन्मुखम् ।
प्रत्यग्रकञ्जायतलोललोचनं सुचम्पकाकोरकनासिकायुतम् ॥ ३ ॥

प्रवालमध्यार्पितकुन्दकोरकं स्फुरत्कपोलद्युतिदीप्तकुण्डलम् ।
केयूरभूषायुतबाहुदण्डकं सुचक्रशङ्खाब्जगदाविराजितम् ॥ ४ ॥

ग्रैवेयरत्नाभरणादिभूषितं सत्कौस्तुभावेष्टितकम्बुकन्धरम् ।
सुवर्णसूत्राञ्चितसुन्दरोरसं विचित्रपिताम्बरधारिणं प्रभुम् ॥ ५ ॥

करिराजकरोपमोरुयुग्मं प्रियया सेवितजङ्घया समेतम् ।
वरकूर्मप्रपदेन शोभमानं ह्यनभिव्यक्तसुगुल्फपादयुग्मम् ॥ ६ ॥

नखराजिसुपूर्णचन्द्रकान्त्या नुतिमज्जनतापहारिणं रमेशम् ।
निजपूर्णसुबोधविग्रहं परमानन्दपरात्मदैवतम् ॥ ७ ॥

इति श्रीत्रिविक्रमपण्डिताचार्यविरचिता श्रीविष्णुस्तुतिः समाप्ता ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 6. Shri Hari Vaayu Stuti



The Hari Vaayu Stuti is a prayer to Shri Vishnu and the three avataaras of Praana Deva, namely Shri Hanumaan, Bheemasena and Madhvacharya. It was composed by Shri Trivikrama Panditaachaarya, one of the foremost disciples of Shripaada Madhvacharya and a former Smaarta scholar. When he once looked into the inner sanctum of the Udupi temple, where Madhvacharya was worshiping Shri Vishnu, he noticed him in three forms – Hanumaan worshiping Shri Raama, Bheema worshiping Shri Krshna and Shrimat Aachaarya worshiping Vyaasa Deva. Upon looking at that sight, he chanted the Vaayu Stuti, praising Mukhya Praana Deva and his three avataaras. However, Shripaada Madhvacharya stated

© Copyrights 2022-26 Achyuta Bhakti Deets

that it is necessary to propitiate Shri Vishnu too, through all actions, which is why he composed the Narasimha Nakha Stuti, to be chanted before and after the Vaayu Stuti. Therefore, it has been included here too.

© Copyrights 2022-26 Achyuta Bhakti Deets

## ॥ श्रीहरिवायुस्तुतिः ॥

॥ अथ श्री नखस्तुतिः ॥

पान्त्वस्मान् पुरुहूतवैरि बलवन्मातङ्ग माद्यद्घटा कुम्भोच्चाद्रि विपाटनाधिकपटु प्रत्येक वज्रायिताः ।
श्रीमत्कण्ठीरवास्य प्रतत सुनखरा दारितारातिदूर प्रध्वस्तध्वान्त शान्त प्रवितत मनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकान्त समन्ततोऽपिकलयन् नैवेशितुस्ते समं पश्याम्युत्तम वस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्कर दक्ष नेत्र कुटिल प्रान्तोत्थिताग्नि स्फुरत् खद्योतोपम विस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृता श्रीनृसिंहनखरस्तुतिः समाप्ता ॥

॥ अथ श्रीहरिवायुस्तुतिः ॥

श्रीमद्विष्ण्वङ्घ्रि निष्ठा अतिगुणगुरुतम श्रीमदानन्दतीर्थ त्रैलोक्याचार्य पादोज्ज्वल जलजलसत् पांसवोऽस्मान्पुनन्तु ।
वाचांयत्रप्रणेत्रीत्रिभुवनमहिता शारदा शारदेन्दुः ज्योत्स्नाभद्रस्मित श्रीधवळितककुभाप्रेमभारम्बभार ॥ १ ॥

उत्कण्ठाकुण्ठकोलाहलजवविदिताजस्रसेवानुवृद्ध प्राज्ञात्मज्ञान धूतान्धतमससुमनो मौलिरत्नावळीनाम् ।
भक्त्युद्रेकावगाढ प्रघटनसघटात्कार सङ्घृष्यमाण प्रान्तप्राग्र्याङ्घ्रि पीठोत्थित कनकरजः पिञ्जरारञ्जिताशाः ॥ २ ॥

जन्माधिव्याध्युपाधिप्रतिहतिविरहप्रापकाणां गुणानाम् अग्र्याणां अर्पकाणां चिरमुदितचिदानन्द सन्दोहदानाम् ।
एतेषामेशदोष प्रमुषितमनसां द्वेषिणां दूषकाणाम् दैत्यानामार्थिमन्धे तमसि विदधतां संस्तवेनास्मि शक्तः ॥ ३ ॥

अस्याविष्कर्तुकामं कलिमलकलुषेऽस्मिन्जनेज्ञानमार्गम् वन्द्यं चन्द्रेन्द्ररुद्र द्युमणिफणिवयोः नायकद्यैरिहाद्य ।
मध्वाख्यं मन्त्रसिद्धं किमुतकृतवतो मारुतस्यावतारम् पातारं पारमेष्ट्यं पदमपविपदः प्राप्तुरापन्न पुंसाम् ॥ ४ ॥

उद्यद्विद्युत्प्रचण्डां निजरुचि निकरव्याप्त लोकावकाशो बिभ्रद्भीमो भुजेयोऽभ्युदित दिनकराभाङ्गदाढ्य प्रकाण्डे ।
वीर्योद्धार्यां गदाग्र्यामयमिह सुमतिंवायुदेवोविदध्यात् अध्यात्मज्ञाननेता यतिवरमहितो भूमिभूषामर्णिमे ॥ ५ ॥

संसारोत्तापनित्योपशमद सदय स्नेहहासाम्बुपूर प्रोद्यद्विद्यावनद्य द्युतिमणिकिरण श्रेणिसम्पूरिताशः ।
श्रीवत्साङ्काधि वासोचित तरसरलश्रीमदानन्दतीर्थ क्षीराम्भोधिर्विभिन्द्याद्भवदनभिमतम्भूरिमेभूति हेतुः ॥ ६ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

मूर्धन्येषोऽन्जलिर्मे दृढतरमिहते बध्यते बन्धपाश क्षेत्रेधात्रे सुखानां भजति भुवि भविष्यद्विधात्रे द्युभर्त्रे ।
अत्यन्तं सन्ततं त्वं प्रदिश पदयुगे हन्त सन्ताप भाजाम् अस्माकं भक्तिमेकां भगवत उतते माधवस्याथ वायोः ॥ ७ ॥

साभ्रोष्णाभीशु शुभ्रप्रभमभयनभो भूरिभूभृद्विभूतिः भ्राजिष्णुर्भूरृभूणां भवनमपि विभोऽभेदिबभ्रेबभूवे ।
येनभ्रोविभ्रमस्ते भ्रमयतुसुभृशं बभ्रुवद्दुर्भृताशान् भ्रान्तिर्भेदाव भासस्त्विवितिभयमभि भोर्भूक्ष्यतोमायिभिक्षून् ॥ ८ ॥

येऽमुम्भावम्भजन्ते सुरमुखसुजनाराधितं ते तृतीयम् भासन्ते भासुरैस्ते सहचरचलितैश्चामरैश्चारुवेशाः ।
वैकुण्ठे कण्ठलग्न स्थिरशुचि विलसत्कान्ति तारुण्यलीला लावण्या पूर्णकान्ता
कुचभरसुलभाश्लेषसम्मोदसान्द्राः ॥ ९ ॥

आनन्दान्मन्दमन्दा ददति हि मरुतः कुन्दमन्दारनन्द्यावर्ताऽमोदान् दधानां मृदुपद मुदितोद्गीतकैः सुन्दरीणाम् ।
वृन्दैरावन्द्य मुक्तेन्द्वहिमगु मदनाहीन्द्र देवेन्द्रसेव्येमौकुन्दे मन्दरेऽस्मिन्नविरतमुदयन्मोदिनां देव देव ॥ १० ॥

उत्तप्तात्युत्कटत्विट् प्रकटकटकट ध्वानसङ्घट्टनोद्यद्विद्युद्व्यूढस्फुलिङ्ग प्रकर विकिरणोत्क्वाथिते बाधिताङ्गान् ।
उद्गाढम्पात्यमाना तमसि तत इतः किङ्करैः पङ्किलेतेपङ्क्तिर्ग्राव्णां गरिम्णां ग्लपयति हि भवद्वेषिणो विद्वदाद्य ॥ ११ ॥

अस्मिन्नस्मद्गुरूणां हरिचरण चिरध्यान सन्मङ्गलानाम्युष्माकं पार्श्वभूमिं धृतरणरणिकः स्वर्गिसेव्यांप्रपन्नः ।
यस्तूदास्ते स आस्तेऽधिभवमसुलभ क्लेश निर्मूकमस्तप्रायानन्दं कथं चिन्नवसति सततं पञ्चकष्टेऽतिकष्टे ॥ १२ ॥

क्षुत् क्षामान् रूक्षरक्षो रदखरनखर क्षुण्णविक्षोभिताक्षान्आमग्नानान्धकूपे क्षुरमुखमुखरैः पक्षिभिर्विक्षताङ्गान् ।
पूयासृन्मूत्र विष्ठा क्रिमिकुलकलिलेतत्क्षणक्षिप्त शक्त्याद्यस्त्रव्रातार्दितान् स्त्वद्विष उपजिहते वज्रकल्पा जलूकाः ॥ १३ ॥

मातर्मेमातरिश्वन् पितरतुलगुरो भ्रातरिष्टाप्तबन्धोस्वामिन्सर्वान्तरात्मन्नजरजरयितः जन्ममृत्यामयानाम् ।
गोविन्दे देहिभक्तिं भवतिच भगवन्नूर्जितां निर्निमित्ताम्निर्व्याजां निश्चलां सद्गुणगण बृहतीं शाश्वतीमाशुदेव ॥ १४ ॥

विष्णोरत्त्युत्तमत्वादखिलगुणगणैस्तत्र भक्तिङ्गरिष्ठाम् संश्लिष्टे श्रीधराभ्याममुमथ परिवारात्मना सेवकेषु ।
यः सन्धत्ते विरिञ्चि श्वसन विहगपानन्त रुद्रेन्द्र पूर्वेष्वाध्यायंस्तारतम्यं स्फुटमवति सदा वायुरस्मद्गुरुस्तम् ॥ १५ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

तत्त्वज्ञान् मुक्तिभाजः सुखयिसि हि गुरो योग्यतातारतम्यात् आधत्से मिश्रबुद्धिं
स्त्रिदिवनिरयभूगोचरान्नित्यबद्धान् ।
तामिस्रान्धादिकाख्ये तमसिसुबहुलं दुःखयस्यन्यथाज्ञान् विष्णोराज्ञाभिरित्थं शृति शतमितिहासादि चाकर्णयामः ॥ १६ ॥

वन्देऽहं तं हनूमानिति महितमहापौरुषो बाहुशालिख्यातस्तेऽग्र्योऽवतारः सहित इह बहुब्रह्मचर्यादि धर्मैः ।
सस्नेहानां सहस्वानहरहरहितं निर्दहन् देहभाजाम्अंहोमोहापहो यः स्पृहयति महतीं भक्तिमद्यापि रामे ॥ १७ ॥

प्राक्पञ्चाशत्सहस्रैर्व्यवहितमहितं योजनैः पर्वतं त्वम्यावत्सञ्जीवनाद्यौषध निधिमधिकप्राणलङ्कामनैषिः ।
अद्राक्षीदुत्पतन्तं तत उत गिरिमुत्पाटयन्तं गृहीत्वायान्तं खे राघवाङ्घ्रौ प्रणतमपि तदैकक्षणे त्वांहिलोकः ॥ १८ ॥

क्षिप्तः पश्चात्सत्सलीलं शतमतुलमते योजनानां सउच्चस्तावद्विस्तार वंश्च्यापि उपललवैव व्यग्रबुद्ध्या त्वयातः ।
स्वस्वस्थानस्थिताति स्थिरशकल शिलाजाल संश्लेष नष्टछेदाङ्कः प्रागिवाभूत् कपिवरवपुषस्ते नमः कौशलाय ॥ १९ ॥

दृष्ट्वा दृष्टाधिपोरः स्फुटितकनक सद्वर्म घृष्टास्थिकूटम् निष्पिष्टं हाटकाद्रि प्रकट तट तटाकाति शङ्को जनोऽभूत् ।
येनाजौ रावणारिप्रियनटनपटुर्मुष्टिरिष्टं प्रदेष्टुम् किंनेष्टे मे स तेऽष्टापदकट कतटित्कोटि भामृष्ट काष्ठः ॥ २० ॥

देव्यादेश प्रणीति दृहिण हरवरावद्य रक्षो विघाताऽद्यासेवोद्यद्दयार्द्रः सहभुजमकरोद्रामनामा मुकुन्दः ।
दुष्प्रापे पारमेष्ठ्ये करतलमतुलं मूर्धिविन्यस्य धन्यम् तन्वन्भूयः प्रभूत प्रणय विकसिताब्जेक्षणस्त्वेक्षमाणः ॥ २१ ॥

जघ्नेनिघ्नेनविघ्नो बहुलबलबकध्वंस नाद्येनशोचत् विप्रानुक्रोश पाशैरसु विधृति सुखस्यैकचक्राजनानाम् ।
तस्मैतेदेव कुर्मः कुरुकुलपतये कर्मणाचप्रणामान् किर्मीरं दुर्मतीनां प्रथमं अथ च यो नर्मणा निर्ममाथ ॥ २२ ॥

निर्मृद्नन्नत्य यत्नं विजरवर जरासन्ध कायास्थिसन्धीन् युद्धे त्वं स्वध्वरे वापशुमिवदमयन् विष्णु पक्षद्विडीशम् ।
यावत्प्रत्यक्ष भूतं निखिलमखभुजं तर्पयामासिथासौ तावत्यायोजि तृप्त्याकिमुवद भघवन् राजसूयाश्वमेधे ॥ २३ ॥

क्ष्वेलाक्षीणाट्टहासहं तवरणमरिहन्नुद्गदोद्दामबाहोः बह्वक्षौहिण्य नीकक्षपण सुनिपुणं यस्य सर्वोत्तमस्य ।
शुश्रूशार्थं चकर्थ स्वयमयमथ संवक्तुमानन्दतीर्थ श्रीमन्नामन्समर्थस्त्वमपि हि युवयोः पादपद्मं प्रपद्ये ॥ २४ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

द्दह्यन्तींहृद्दहं मां द्दतमनिल बलाद्रावयन्तीमविद्या निद्रांविद्राव्य सद्यो रचनपटुमथापाद्यविद्यासमुद्र ।
वाग्देवी सा सुविद्या द्रविणद विदिता द्रौपदी रुद्रपत्न्यात् उद्रिक्ताद्रागभद्रा द्रहयतु दयिता पूर्वभीमाज्ञयाते ॥ २५ ॥

याभ्यां शुश्रूषुरासीः  कुरुकुल जनने क्षत्रविप्रोदिताभ्याम् ब्रह्मभ्यां बृंहिताभ्यां चितसुख वपुषा कृष्णनामास्पदाभ्याम् ।
निर्भेदाभ्यां विशेषाद्विवचन विशयाभ्यामुभाभ्याममूभ्याम् तुभ्यं च क्षेमदेभ्यः सरिसिजविलसल्लोचनेभ्यो नमोऽस्तु ॥ २६ ॥

गच्छन् सौगन्धिकार्थं पथि स हनुमतः पुच्छमच्छस्य भीमः प्रोद्धर्तुं नाशकत्स त्वमुमुरुवपुषा भीषयामास चेति ।
पूर्णज्ञानौजसोस्ते गुरुतमवपुषोः श्रीमदानन्दतीर्थ क्रीडामात्रं तदेतत् प्रमदद सुधियां मोहक द्वेषभाजाम् ॥ २७ ॥

बह्वीः कोटीरटीकः कुटलकटुमतीनुत्कटाटोप कोपान् द्राक्चत्वं सत्वरत्वाच्चरणद गदया पोथयामासिथारीन् ।
उन्मथ्या तत्थ्य मिथ्यात्व वचन वचनान् उत्पथस्थांस्तथाऽयान् प्रायच्छः स्वप्रियायै प्रियतम कुसुमं प्राण तस्मै नमस्ते ॥ २८ ॥

देहादुत्क्रामितानामधिपति रसतामक्रमाद्वक्रबुद्धिः क्रुद्धः क्रोधैकवश्यः क्रिमिरिव मणिमान् दुष्कृती निष्क्रियार्थम् ।
चक्रे भूचक्रमेत्य क्रकचमिव सतां चेतसः कष्टशास्त्रं दुस्तर्कं चक्रपाणेर्गुणगण विरहं जीवतां चाधिकृत्य ॥ २९ ॥

तद्दुत्प्रेक्षानुसारात्कतिपय कुनरैराद्दतोऽन्यैर्विसृष्टो ब्रह्माहं निर्गुणोऽहं वितथमिदमिति ह्येषपाशण्डवादः ।
तद्युक्त्याभास जाल प्रसर विषतरूद्दाहदक्षप्रमाण ज्वालामालाधरोऽग्निः पवन विजयते तेऽवतारस्तृतीयः ॥ ३० ॥

आक्रोशन्तोनिराशा भयभर विवशस्वाशयाच्छिन्नदर्पा वाशन्तो देशनाशस्त्विति बत कुधियां नाशमाशादशाऽशु ।
धावन्तोऽश्लीलशीला वितथ शपथ शापा शिवाः शान्त शौर्याः त्वद्याख्या सिंहनादे सपदि ददृशिरे मायि गोमायवस्ते ॥ ३१ ॥

त्रिष्वप्येवावतारेष्वरिभिरपघृणं हिंसितोनिर्विकारः सर्वज्ञः सर्वशक्तिः सकलगुणगणापूर्ण रूपप्रगल्भः ।
स्वच्छः स्वच्छन्द मृत्युः सुखयसि सुजनं देवकिं चित्रमत्र त्राता यस्य त्रिधामा जगदुतवशगं किङ्कराः शङ्कराद्याः ॥ ३२ ॥

उद्यन्मन्दस्मित श्रीर्मृदु मधुमधुरालाप पीयूषधारा पूरासेकोपशान्ता सुखसुजन मनोलोचना पीयमानं ।
सन्द्रक्ष्येसुन्दरं सन्दुहदिह महदानन्दं आनन्दतीर्थ श्रीमद्वक्तेन्द्रु बिम्बं दुरतनुदुदितं नित्यदाहं कदानु ॥ ३३ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

प्राचीनाचीर्ण पुण्योच्चय चतुरतराचारतश्चारुचित्तान् अत्युच्चां रोचयन्तीं शृतिचित वचनांश्राव कांश्चोद्यचुञ्चून् ।
व्याख्यामुत्खात दुःखां चिरमुचित महाचार्य चिन्तारतांस्ते चित्रां सच्छास्त्रकर्ताश्चरण परिचरां छ्रावयास्मांश्चकिञ्चित् ॥ ३४ ॥

पीठेरत्नोकपक्लृप्ते रुचिररुचिमणि ज्योतिषा सन्निषण्णम् ब्रह्माणं भाविनं त्वां ज्वलति निजपदे वैदिकाद्या हि विद्याः ।
सेवन्ते मूर्तिमत्यः सुचरितचरितं भाति गन्धर्व गीतंप्रत्येकं देवसंसत्स्वपि तव भघवन्नर्तितद्द्योवधूषु ॥ ३५ ॥

सानुक्रोषैरजस्रं जनिमृति निरयाद्यूर्मिमालाविलेऽस्मिन् संसाराब्धौनिमग्नांशरणमशरणानिच्छतो वीक्ष्यजन्तून् ।
युष्माभिः प्राथितः सन् जलनिधिशयनः सत्यवत्यां महर्षेः व्यक्तश्चिन्मात्र मूर्तिनखलु भगवतः प्राकृतो जातु देहः ॥ ३६ ॥

अस्तव्यस्तं समस्तशृति गतमधमैः रत्नपूगं यथान्धैः अर्थं लोकोपकृत्यैः गुणगणनिलयः सूत्रयामास कृत्स्नम् ।
योऽसौ व्यासाभिधानस्तमहमहरहः भक्तितस्त्वत्प्रसादात् सद्यो विद्योपलब्ध्यै गुरुतममगुरुं देवदेवं नमामि ॥ ३७ ॥

आज्ञामन्यैरधार्यां शिरसि परिसरद्रश्मि कोटीरकोटौ कृष्णस्याक्लिष्ट कर्मादधदनु सराणादर्थितो देवसङ्घैः ।
भूमावागत्य भूमन्नसुकरमकरोर्ब्रह्मसूत्रस्य भाष्यम् दुर्भाष्यं व्यास्यदस्योर्मणिमत उदितं वेदसद्युक्तिभिस्त्वम् ॥ ३८ ॥

भूत्वाक्षेत्रे विशुद्धे द्विजगणनिलये रौप्यपीठाभिधाने तत्रापि ब्रह्मजातिस्त्रिभुवन विशदे मध्यगेहाख्य गेहे ।
पारिव्राज्याधि राजः पुनरपि बदरीं प्राप्य कृष्णं च नत्वा कृत्वा भाष्याणि सम्यक् व्यतनुत च भवान् भरतार्थप्रकाशम् ॥ ३९ ॥

वन्दे तं त्वां सुपूर्ण प्रमतिमनुदिना सेवितं देववृन्दैः वन्दे वन्दारुमीशे श्रिय उत नियतं श्रीमदानन्दतीर्थम् ।
वन्दे मन्दाकिनी सत्सरिदमल जलासेक साधिक्य सङ्गम् वन्देऽहं देव भक्त्या भव भय दहनं सज्जनान्मोदयन्तम् ॥ ४० ॥

सुब्रह्मण्याख्य सूरेः सुत इति सुभृशं केशवानन्दतीर्थश्रीमत्पादाब्ज भक्तः स्तुतिमकृत हरेर्वायुदेवस्य चास्य ।
त्वत्पादार्चादरेण ग्रथित पदल सन्मालया त्वेतयायेसंराध्यामूनमन्ति प्रततमतिगुणा मुक्तिमेते व्रजन्ति ॥ ४१ ॥

इति श्रीत्रिविक्रमपण्डिताचार्य विरचितं श्रीहरिवायुस्तुतिः सम्पूर्णम् ॥

॥ अथ श्री नखस्तुतिः ॥

पान्त्वस्मान् पुरुहूतवैरि बलवन्मातङ्ग माद्यद्घटा कुम्भोच्चाद्रि विपाटनाधिकपटु प्रत्येक वज्रायिताः ।
श्रीमत्कण्ठीरवास्य प्रतत सुनखरा दारितारातिदूर प्रध्वस्तध्वान्त शान्त प्रवितत मनसा भाविता भूरिभागैः ॥ १ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

लक्ष्मीकान्त समन्ततोऽपिकलयन् नैवेशितुस्ते समं पश्याम्युत्तम वस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्कर दक्ष नेत्र कुटिल प्रान्तोत्थिताग्नि स्फुरत् खद्योतोपम विस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृता श्रीनृसिंहनखरस्तुतिः समाप्ता ॥

॥ श्रीभारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 7. Shri Narasimha Stuti of Shri Naaraayana Panditaachaarya

**॥ श्रीनरसिंहस्तुतिः ॥**

उदयरविसहस्रद्योतितं रूक्षवीक्षं प्रळयजलधिनादं कल्पकृद्वह्निवक्त्रम् ।
सुरपतिरिपुवक्षःक्षोदरक्तोक्षिताङ्गं प्रणतभयहरं तं नारसिंहं नमामि ॥ १ ॥

प्रळयरविकरालाकाररुक्चक्रवालं विरलयदुरुरोचीरोचिताशान्तराल ।
प्रतिभयतमकोपात्युत्कटोच्चाट्टहासिन् दह दह नरसिंहासह्यवीर्याहितं मे ॥ २ ॥

सरसरभसपादापातभाराभिराव प्रचकितचलसप्तद्वन्द्वलोकस्तुतस्त्वम् ।
रिपुरुधिरनिषेकेणैव खोणङ्किशालिन् दह दह नरसिंहासह्यवीर्याहितं मे ॥ ३ ॥

तव घनघनघोषो घोरमापघ्राय जङ्घापरिघमलघुमूरुव्याजतेजोगिरिं च ।
घनविघटितमागाद्दैत्यजङ्घालसङ्घो दह दह नरसिंहासह्यवीर्याहितं मे ॥ ४ ॥

कटकिकटकराजद्धाटकाग्र्यस्थलाभाप्रकटपटतटित्ते सत्कटिस्थातिपट्वी ।
कटुककटुकदुष्टाटोपदृष्टिप्रमुष्टौ दह दह नरसिंहासह्यवीर्याहितं मे ॥ ५ ॥

प्रखरनखरवज्रोत्खातरूक्षादिवक्षः शिखरिशिखररक्तैराक्तसन्दोहदेह ।
सुवलिभशुभकुक्षे भद्रगंभीरनाभे दह दह नरसिंहासह्यवीर्याहितं मे ॥ ६ ॥

स्फुरयति तव साक्षात्सैव नक्षत्रमाला क्षपितदितिजवक्षोव्याप्तनक्षत्रमार्गम् ।
अरिदरधर जान्वासक्तहस्तद्वयाहो दह दह नरसिंहासह्यवीर्याहितं मे ॥ ७ ॥

कटुविकटसटौघोद्घट्टनोद्भ्रष्टभूयो घनपटलविशालाकाशलब्धावकाशम् ।
करपरिघविमर्दप्रोद्यमं ध्यायतस्ते दह दह नरसिंहासह्यवीर्याहितं मे ॥ ८ ॥

हठलुठदलधिष्ठोत्कण्ठ दष्टोष्ठ विद्युत्सट शठकठिनोरःपीठभित्सुष्ठुनिष्ठाम् ।
पठति नु तव कण्ठाधिष्ठघोरान्त्रमाला दह दह नरसिंहासह्यवीर्याहितं मे ॥ ९ ॥

हत बहुमिहिराभासह्यसंहाररंहो हुतवहबहुहेतिह्रेषितानन्तहेति ।
अहितविहितमोहं संवहन् सैंहमास्यं दह दह नरसिंहासह्यवीर्याहितं मे ॥ १० ॥

गुरुगुरुगिरिराजत्कन्दरान्तर्गते वा दिनमणिमणिश्रृङ्गे वान्तवह्निप्रदीप्ते ।
दधदतिकदुदंष्ट्रे भीषणोज्जिह्ववक्त्रे दह दह नरसिंहासह्यवीर्याहितं मे ॥ ११ ॥

अधरितविबुधाब्धिध्यानधैर्यं विदध्यद्विविधविबुधधीश्रद्धापितेन्द्रारिनाशम् ।
विदधदतिकटाहोद्धट्टहासं दह दह नरसिंहासह्यवीर्याहितं मे ॥ १२ ॥

त्रिभुवनतृणमात्रत्राणतृष्णार्द्रनेत्रत्रयमतिलधितार्चिर्विष्टपादम् ।
नवतररविताम्रं धारयन् रूक्षवीक्षं दह दह नरसिंहासह्यवीर्याहितं मे ॥ १३ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

भ्रमदभिभवभूभृद्भूरिभूभारसद्भिद्भिदनवविभवभ्रूविभ्रमादभ्रशुभ्र ।
ऋभुभवभयभेत्तर्भासि भोभोविभोभी दह दह नरसिंहासह्यवीर्याहितं मे ॥ १४ ॥

श्रवणकचितचञ्चत्कुण्डलोच्चण्डगण्ड भ्रुकुटिकटुललाटश्रेष्ठनासारुणोष्ठ ।
वरद सुरद राजत्केसरोत्सारितारे दह दह नरसिंहासह्यवीर्याहितं मे ॥ १५ ॥

कविकचकचराजद्रत्नकोटीरशालिन् गलगतगलदुस्रोदाररत्नाङ्गदाढ्य ।
कनककटककाञ्चीशिञ्जिनीमुद्रिकावन् दह दह नरसिंहासह्यवीर्याहितं मे ॥ १६ ॥

अरिदरमसिखेटौ बाणचापे गदां सन्मुसलमपि दधानः पाशवर्याङ्कुशौ च ।
करयुगलधृतान्त्रस्रग्विभिन्नारिवक्षो दह दह नरसिंहासह्यवीर्याहितं मे ॥ १७ ॥

चट चट चट दूरं मोहय भ्रामयारीन् कडि कडि कडि कायं ज्वालरय स्फोटयस्व ।
जहि जहि जहि वेगं शात्रवं सानुबन्धं दह दह नरसिंहासह्यवीर्याहितं मे ॥ १८ ॥

विधिभव विबुधेशभ्रामकाग्निस्फुलिङ्गप्रसविविकटदंष्ट्रोज्जिह्ववक्त्रत्रिनेत्र ।
कलकलकल कामं पाहि मां ते सुभक्तं दह दह नरसिंहासह्यवीर्याहितं मे ॥ १९ ॥

कुरु कुरु करुणां तां साङ्कुरां दैत्यपोते दिश दिश विशदां मे शाश्वतीं देवदृष्टिम् ।
जय जय जयमूर्तेऽनार्त जेतव्यपक्षं दह दह नरसिंहासह्यवीर्याहितं मे ॥ २० ॥

स्तुतिरियमहितघ्नी सेविता नारसिंही तनुरिव परिशान्ता मालिनी साभितोलम् ।
तदखिलगुरुमाग्र्याश्रीदरूपा महद्भिस्सुनियमनयकृत्यैस्सद्गुणैर्नित्ययुक्ता ॥ २१ ॥

लिकुचतिलकसूनुस्सद्धितार्थानुसारी नरहरिनुतिमेतां शत्रुसंहारहेतुम् ।
अकृत सकलपापध्वंसिनीं यः पठेत्तां व्रजति नृहरिलोकं कामलोभाद्यसक्तः ॥ २२ ॥

इति श्रीमन्नारायणपण्डिताचार्य विरचिता श्रीनरसिंहस्तुतिः समाप्ता ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 8. Shri Maha Lakshmi Stuti

(Vishnu Puraana, Amsha 1, Adhyaaya 9, Shlokas 116-131)

This is a Stuti for Maha Lakshmi Devi, chanted by Indra Deva.



नमस्ते सर्व्वभूतांनां जननीमब्जसम्भवाम् ।
श्रियमुन्निद्रपद्माक्षी विष्णोर्वक्षः स्थलस्थिताम् ॥ ११६ ॥

त्वं सिद्धिस्त्वं सुधा स्वाहा स्वधा त्वं लोकपावनि ।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥ ११७ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ ११८ ॥

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च ।
सौम्यासौम्यैर्ज्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥ ११९ ॥

का त्वन्या त्वामृते देवि सर्व्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ १२० ॥

त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥ १२१ ॥

दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकम् ।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥ १२२ ॥

शरीरारोग्यमैश्वर्य्यमरिपक्षक्षयः सुखम् ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ १२३ ॥

त्वं माता सर्व्वभूतानां देवदवो हरिः पिता ।
त्वयैतद्विष्णुना चाद्य जगद् व्याप्तं चराचरम् ॥ १२४ ॥

मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ।
मा शरीरं कलत्रञ्च त्यजेथाः सर्व्वपावनि ॥ १२५ ॥

मा पुत्रान् मा सुहृद्वर्गं मा पशून् मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२६ ॥

सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ॥ १२७ ॥

त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्य्यैश्च मुह्यन्ते पुरुषा निर्गुणा अपि ॥ १२८ ॥

स श्लाध्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ॥ १२९ ॥

सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
पराङ्मुखी जगद्धात्रि यस्य त्वं विष्णुवल्लभे ॥ १३० ॥

न ते वर्णायितुं शक्ता गुणान् जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥ १३१ ॥

© Copyrights 2022-26 Achyuta Bhakti Deets



© Copyrights 2022-26 Achyuta Bhakti Deets

# 9. Shri Shiva Stuti

**॥ श्रीशिवस्तुतिः ॥**

स्फुटं स्फटिकसप्रभं स्फटितहारकश्रीजटं शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्कदा नु शितिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥ १ ॥

त्रिलोचन विलोचने लसति ते ललामायिते स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् ।
स्वभक्तिलतया वशीकृतवतीसतीयं सती स्वभक्तवशतो भवानपि वशी प्रसीद प्रभो ॥ २ ॥

महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवानघोररिपुघोर तेऽनवम वामदेवाञ्जलिः ।
नमः सपदि जात ते त्वमिति पञ्चरूपोचितप्रपञ्चचयपञ्चवृन्मम मनस्तमस्ताडय ॥ ३ ॥

रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम् ।
प्रशान्तमुत भीषणं भुवनमोहनं चेत्यहो वपूंषि गुणपूषितेऽहमहमात्मनोऽहंभिदे ॥ ४ ॥

विमुक्तिपरमाध्वनां तव पडध्वनामास्पदं पदं निगमवेदिनो जगति वामदेवादयः ।
कथञ्चिदुपशिक्षिता भगवतैव संविद्रते वयं तु विरलान्तराः कथमुमेश तन्मन्महे ॥ ५ ॥

कठोरितकुठारया ललितशूलया बाहया रणड्डमरया स्फुरद्धरिणया सखट्वाङ्गया ।
चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यतश्चतुर्दश जगन्ति ते जयजयेत्ययुर्विस्मयम् ॥ ६ ॥

पुरा त्रिपुररन्धनं विविधदैत्यविध्वंसनं पराक्रमपरम्परा अपि परा न ते विस्मयः ।
अमर्षिबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वलज्ज्वलज्ज्वलनहेलया शलभितं हि लोकत्रयम् ॥ ७ ॥

सहस्रनयनो गुहः सहसहस्ररश्मिर्विधुर्बृहस्पतिरुताप्पतिः ससुरसिद्धविद्याधराः ।
भवत्पदपरायणाः श्रियमिमां ययुः प्रार्थितां भवान् सुरतरुर्भृशं शिव शिवां शिवावल्लभ ॥ ८ ॥

तव प्रियतमादतिप्रियतमं सदैवान्तरं पयस्युपहितं भृतं स्वयमिव श्रियो वल्लभम् ।
विबुध्य लघुबुद्धयः स्वपरपक्षलक्ष्यायितं पठन्ति हि लुठन्ति ते शठहृदः शुचा शुण्ठिताः ॥ ९ ॥

निवासनिलयाचिता तव शिरस्ततिर्मालिका कपालमपि ते करे त्वमशिवोस्यनन्तर्धियाम् ।
तथापि भवतः पदं शिवशिवेत्यदो जल्पतां अकिञ्चन न किञ्चन वृजिनमस्ति भस्मीभवेत् ॥ १० ॥

त्वमेव किल कामधुक् सकलकाममापूरयन्सदा त्रिनयनो भवान्वहति चार्चिनेत्रोद्भवम् ।
विषं विषधरान्दधत्पिबसि तेन चानन्दवान्विरुद्धचरितोचिता जगदधीश ते भिक्षुता ॥ ११ ॥

नमः शिवशिवाशिवाशिवशिवार्थं कृन्ताशिवं नमो हरहराहराहरहरान्तरीं मे दृशम् ।
नमो भवभवाभवप्रभवभूतये मे भवान् नमो मृड नमो नमो नम उमेश तुभ्यं नमः ॥ १२ ॥

सतां श्रवणपद्धतिं सरतु सन्नतोक्तेत्यसौ शिवस्य करुणाङ्कुरात्प्रतिकृतात्सदा सोचिता ।
इति प्रथितमानसो व्यधित नाम नारायणः शिवस्तुतिमिमां शिवं लिकुचिसूरिसूनुः सुधीः ॥ १३ ॥

इति श्रीमल्लिकुचिसूरिसूनुनारायणपण्डिताचार्यविरचिता शिवस्तुतिः सम्पूर्णा ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

# 10. Shri Purnabodha Stotra

**॥ श्री पूर्णबोधस्तोत्रम् ॥**

नलिनसौन्दर्यजिष्णुं पदाभ्यां ललितरूपाङ्गलीमङ्गलाभ्याम् ।
दलितनूत्रेन्दुमानं नखाल्या दलितशोणोपलालीकनाल्या ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ १ ॥

अहिविहङ्गेशभूतेशपूर्वैरहमहंपूर्वमित्याप्तचित्तैः ।
मुहुरहोमांसनेत्रैरदृष्टैरिह समाजुष्टजङ्घाङ्घ्रिरेणुम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ २ ॥

कनयमानं दधानं प्रकाशैः कनककौशेयमाशावकाशम् ।
जनमनोहारिवृत्तोरुकान्त्या जनितसंपर्कसंपद्विशेषम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ३ ॥

परदुरारोहमारोहयेद्यं पुरुषकाण्डप्रकाण्डो निजाङ्कम् ।
निरवधिस्नेहसन्दोह मन्दस्फुरितहासावलोकेन साकम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ४ ॥

सुवलिभंभद्रगंभीरनाभिं शिवमुदारोदरं मंलुमध्यम् ।
सुविपुलोरः स्थळं मानयन्ते कविजना यस्य सन्देहदेहम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ५ ॥

विकटसुस्तंभसं भावनीयं प्रकटमंभोजनाभोपभाजा ।
विकटविद्याविलासाङ्गणं धीस्फुटकनन्मण्टपं यस्य रम्यम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ६ ॥

भुजगभोगाभमुद्यम्य हृद्यं निजमुजं दक्षिणं लक्षणाढ्यम् ।
ललितमुद्रिक्तविज्ञानमुद्रं भज भजानन्तमित्यालपन्तम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ७ ॥

भवदवोष्णेन तातप्यमानान् भुवि परं ताथमप्रेक्षमाणान् ।
भुवनमान्येन चान्येन दोष्णा भवतु भीर्मेति नः सान्त्व यन्तम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ८ ॥

अधिगलं वानरो वन्यमालां विधिमुखोदारभूभारमालाम् ।
विधिविधात्राऽक्षमालां पुरा यो व्यधित लोकाततां कीर्तिमालाम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ९ ॥

मृदुतमं विभ्रमं बिभ्रदासीद्वदनमिन्दोः समं यस्य साक्षात् ।
मदनमुद्दीपयेदिन्दुरेतन्मदसखं सन्दहेदेष भेदः ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ १० ॥

© Copyrights 2022-26 Achyuta Bhakti Deets

विमुमुहुः सिंहनादेन दैत्याः प्रमुमुहुः सज्जनाः साधुवाण्या ।
ममगुरोः पूर्वतन्वोरिदानीं सममिदं व्याख्यया यस्य जातम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ ११ ॥

शिवमुखैरेकतो देववृन्दैः शुकमुखैऽन्यतः सन्मुनीन्द्रः ।
शुकशुचिव्याख्यमस्राकुलाक्षैः शिरसि बद्धाञ्जलिं भक्तिहेतोः ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ १२ ॥

तरुणहारावलीदन्तपङ्क्तिं शरणदं शारदाश्लाध्यवाचम् ।
करुणया मन्दहासेन मन्दं शरणयातं जनं वीक्षमाणम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ १३ ॥

रघुपवार्ष्णेयवासिष्ठरूपाः प्रभुमहाज्ञामनोज्ञावतंसाः ।
त्रिवपुषाऽप्युत्तमेनोत्तमाङ्गं प्रविदधिरे येन चान्येन तुष्टाः ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ १४ ॥

विधिभवेन्द्रादिदेवाधिनाथं कमलया सन्नतश्रीपदाब्जम् ।
कमलनाभं भजन्तं सुभक्त्या सुजनतुष्टिप्रदं वासुदेवम् ।
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥ १५ ॥

इति लिकुचान्वयकृतं पूर्णबोधस्तोत्रम् ॥

॥ श्रीभारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ॥

---

This document has been provided by Achyuta Bhakti Deets. Visit https://bhaktideets.org or https://elib.bhaktideets.org for more Shaastra related content.

श्री हरये नमः ।

श्रीकृष्णार्पणमस्तु ॥

© Copyrights 2022-26 Achyuta Bhakti Deets